घ
नं. ४९५(क)(ख)(ग)(घ)
Title — राघवपाण्डवीय
Extent ३२+४५+३९
पत्र-१३३
Subject = काव्यम

No — 495

Extent = 133.

ॐ श्रीगणेशाय नमः ॐ नमः सरस्वत्यै ॐ नमो वेद-
व्यासाय ॥ ॐ स्वाधिष्ठानाम्बुजरजःपुंजपिंजरमू-
र्तये इच्छाधीनजगत्सृष्टिकर्मणे ब्रह्मणे नमः ॥
श्रीगणेशं रमानाथं नत्वा गुरुपदाम्बुजम् रघुगु-
णमये काव्ये मया टीका प्रतन्यते ॥ १ ॥ तत्रादौ क-
विर्ग्रन्थसमाप्त्यर्थमिष्टदेवतानमस्काररूपं
मंगलं कुर्वन्नाह स्वेति तस्मै ब्रह्मणे नमोऽस्तु ।
ब्रह्माणं नमामीत्यर्थः कीदृशमधिष्ठानमासनं
यदम्बुजं पद्मं तस्य रजः पुंजः परागसमूहः तद्वत्पिं-
गा मूर्तिः शरीरं यस्य तस्मै अधिष्ठानं पुरे चक्रे प्रभावे
ध्यासनेपि चेति मेदिनीकारः पिंजरोऽश्ववरे पीते क्ली-
वे स्वर्णे च पिङ्गलेऽपि च मूर्तिः काठिन्यकाययोरित्य-
मरः पिंजरो रक्तपीते इति विश्वः ब्रह्मणो रक्तत्वेपि ।
पीतत्वं रजोगुणाख्यापनाय इच्छेति इच्छा स्वकीया
तदधीनं स्वायत्तं जगतो विश्वस्य सृष्टिकर्म सृष्टिक्रि-
या यस्य तस्मै सृष्टिकर्त्रे नतिः काव्यसामर्थ्याय ॥
पुनातु वः सरस्वत्या विलासपिशुकः शुकः वाङ्-
मयमाणिक्यपंजरान्तरगोचरः सरस्वत्याविलासपि-
शुकः शुकोऽसौ अस्मान्पुनातु सरस्वत्याः विलासा-
य क्रीडायै पिशुको बालकः शिशुरिव पिशुकः ।
इवेति प्रतिकृताविति कः प्रशंसायां वा प्रशस्तः
शिशुः शिशुकः एवं पदद्वयं वा सरस्वत्याविलासपिशुकः
विलासो हावभेदे स्याल्लीलायामपीति मेदिनीकारः पि-
शुनस्तनेकौरे इति हालवाङ्मययोरपि शुको व्या-
त्याः करस्य हस्तस्येव इति विश्वः कीदृशः शुकः सरस्व-
त्या माणिक्यहंसस्येव शुभांशवः किरणास्तद्विकार-
नेयस्य करस्य पंजरस्य यदन्तरं मध्यं तत्र गोचरः स्था-
स्य रत्नात्मकत्वात्कारमध्यवर्तीत्यर्थः ॥ १ ॥

ब्रह्माण्डमण्डपस्तम्भाप्यभ्रमद्दमलदीर्घिका जायतां
जगतः प्राणदैशाम्भवीशक्तिरेकला ॥ २ ॥ भवानीक
विः स्मरति शोभायै शाम्भवीशक्तिः जगतो विश्वस्य शो
भैविकस्यवृद्धये जायतां भवतु कीदृशी एकलानी
ति एकला अद्वितीया एकोन्यकेवलाश्चैकैते त्या
ह्वितिकोशाः तथा ब्रह्माण्डमण्डपस्य स्तम्भभूता कपटे
न यस्य भ्रमद्दमले कमलकलिका तस्य दीर्घिकावा
पी कमलस्य वाप्याभावे जगदाधारभूतेत्यर्थः ॥
२ ॥ श्रीलतालिङ्गिताङ्गस्य विश्वकल्पद्रुमस्य वः श्रे
वतारमहाप्राणाः प्रसूतफलमीप्सितम् ॥ ३ ॥ वि
श्वस्यैव कल्पद्रुमः तस्य वतारा भ्रतस्यादय एव महाप्रा
णाः वः युष्माकं वाञ्छितफलं प्रसूत प्रकटीकुर्वन्तु
प्राणावायुर्मारुतोवेदावे भुजेपन्नानतेन्द्रिकेइति विश्वः
कीदृशस्य श्रीरेव लता तया लिङ्गिताङ्गः तस्य तरुः लता
श्लिष्टः रूपकालंकारः ॥ ३ ॥ कान्तिः श्रीकण्ठकण्ठ
स्य जयत्यालिङ्गनोत्सुका स्कंधारूढैव कालिन्दी मौलि
मन्दाकिनीर्ष्यया ॥ ४ ॥ श्रीकण्ठकण्ठस्य कान्तिः
जयति उत्कर्षेण वर्तते कीदृशी मौलौ शिरसि या मन्दा
किनी तस्या ईर्ष्यया अमर्षेणालिङ्गनोत्सुका अत एव
स्कंधमारूढा कालिन्दी यमुनेव स्कंधारूढ आलिङ्गनवि
शेषेपि ॥ ४ ॥ सन्तः करोतु विघ्नानां वारणं वारणाननः
मदधाराभिरारब्धभोगावलिविवालिभिः ॥ ५ ॥ स
वारणाननो गजमुखः नः अस्माकं विघ्नानां वारणं नि
षेधं करोतु विघ्नवारणत्वेन प्रसिद्धः कीदृशः मदधा
राभिरारब्धो भोगानां सर्पशरीराणामावलिः श्रेणिर्य
त्र भोगः सर्वेस्मारिभूता वहेस्त्रफणकायचोरित्यम
रः कीदृशीभिः मदधाराभिः उत्प्रेक्ष्यते अलिभिर्भ्र
मरैरिव मदधारायत्रास्य सर्पोरूपभासेनेत्यर्थः ५॥

जगत्प्रदीपयोर्वंशौ सूर्याचन्द्रमसोरपि ययोरुद्दीपितौ वाग्भिस्तौ वन्दे कविपुंगवौ ॥ १ ॥ तौ प्रसिद्धौ कविपुंगवौ कविश्रेष्ठौ वाल्मीकिव्यासौ वन्दे नौमि कवीपुंगवाविति वा उपमितं व्याघ्रादिभिरिति समासः पुंगवो गवि भेषजे प्रधाने चोत्तरस्थे इति विश्वः तौ कौ जगत्प्रदीपयोः विश्वप्रकाशकयोः सूर्याचन्द्रमसोः वंशौ ययोः वाग्भिरुद्दीपितौ वंशौ प्रकाशितौ रामायणभारतरूपेण वर्णितौ दीपोपि वस्तुप्रकाशकः ॥ १ ॥ अन्यो विधाता वाल्मीकिरादिकाव्यकमण्डलुः रघुनाथकथागंगा तया पूता जगत्त्रयी ॥ २ ॥ वाल्मीकिरन्यो द्वितीयो विधाता ब्रह्मा आदिकाव्यं रामायणं कमण्डलुः रघुनाथकथागंगा तया पूतं पवित्रितं जगत्त्रयम् ब्रह्मकमण्डलुस्था गंगा जगत्पुनातीति प्रसिद्धम् ॥ २ ॥ द्वैपायनो परो ब्रह्मा तत्सृष्टिर्भारतार्णवः सूक्तयो दिव्यरत्नानि त्रैलोक्यं तैरलंकृतम् ॥ ३ ॥ द्वैपायनो वेदव्यासः अपरो द्वितीयो ब्रह्मा भारतरूपः अर्णवः तत्सृष्टिस्तस्य कृतिः सूक्तयः सद्वचनानि दिव्यरत्नानि तै रत्नैस्त्रैलोक्यमलंकृतं शोभितम् ॥ ३ ॥ निःश्रेणी ब्रह्मलोकस्य वाग्देव्याः कर्णकुण्डले धर्मद्रुममहामूले वाल्मीकिव्यासयोः कृती ॥ ४ ॥ वाल्मीकिव्यासयोः कृते रामायणभारते कीदृशे ब्रह्मलोकस्य निःश्रेणी ब्रह्मलोकारोहसाधने वाग्देव्याः सरस्वत्याः कर्णकुण्डलस्थानीये धर्मरूपद्रुमस्य महामूले तयोः श्रवणाद्धर्मो वर्धते ॥ ४ ॥ भारतादिपुराणानि श्रीरामचरितानि च त्रिसंध्यं श्रवणान्येव सर्वसाधारणो मतः ॥ ५ ॥ भारतादीनि पुराणानि रामचरित्राणि च त्रिसंध्यं त्रिषवनानि श्रवणानि पापसंशोधकः सर्वसाधारणः सर्वेषामेतच्छ्रवणात् ॥ ५ ॥ पुराणरामायणभारतादिश्री

गुणासंयोजितभक्तिवत्सैः पुरातनैर्यादृङ् दुदुहे कवी-
न्द्रैः सा भारती कामदुघा ममास्तु ९ ॥ सा भारती सा स-
रस्वती मम कामदुघा अभिलषितदात्री अस्तु कामा-
न् दोग्धे कामदुघा कामधेनुर्भवतु सा कया याची-
नैः कवीन्द्रैः वाल्मीक्यादिभिः पुराणानि मत्स्यादीनि
रामचरितं भारतमित्यादीनि स्तोत्राणि पयांसि दुदुहे दु-
ग्धा द्विकर्मकः कीदृशैः संयोजितः भक्तिरेव वत्सः
यैः भारतीभक्तिं कृत्वा पुराणादीनि कृतानीत्यर्थः ९
अस्ति कादम्बसन्तानसन्तानकनवोद्गमः कामदेव-
स्तस्मादेव कामधेनुर्जनेश्वरः १० ॥ कामदेवो नाम ज-
नेश्वरो राजा अस्ति कीदृशः कादम्बसन्तानः कादम्बस-
न्तकराजवंशः स एव सन्तानकः कल्पतरुः तस्य नवो-
द्गमो नूतनपल्लव उत्थितः अङ्कुरो हधिदेलोत्रिसलि-
लेभिनवोद्गमे तथा तस्मादेवानां विप्राणां कामधेनु-
रभिलषितदाता द्विजात्यग्रजन्मभूदेववाडवाइत्य-
मरः १० ॥ कामः पुरातनो येन नूतनेनाभिभूयते भा-
र्गवो राघवेनेव रामो रामेन संगरे ११ ॥ येन नूतनेन का-
मदेवेन पुरातनः जीर्णः कामदेवः अभिभूयते तिरस्क्रि-
यते नूतनं जीर्णपराभवकारि प्रसिद्धम् यथा रामा-
ण भार्गवो रामो यद्वदभिभूयत १२ ॥ दत्तयः कीर्तय-
श्चैव यदीयाः कर्णमार्गगाः कान्ताभ्यश्च कविभ्यश्च
कामदं यस्य दर्शनम् १४ ॥ यदीयाः यस्य संबंधिन्यो
दत्तयः दानानि कीर्तयो यशांसि च कर्णगामिन्याः श्र-
वणपर्यन्तगमनशीला इत्यर्थः कर्णो राधेयस्तद्गमो-
नुसारिण्यो वा तस्य दानं कीर्तयश्चेत्यर्थः यस्य पुनर्द-
र्शनं कान्ताभ्यो रमणीभ्यः कविभ्यश्च कामदं रतिभाव-
जनकं अभिलषितदं वा यस्येमाः यदीयाः त्यदादीनि
चेति वृद्धिसंज्ञायां छ भावः १४ ॥ दधानोपि धनुर्वि-

रा.च.
पा.टी.
२

3

यो वैशारद्यात्किरीटिवत् अंगनापांगबाणानां यः
स्वयं यातिलक्ष्यताम् ४ ॥ यः कामदेववन्नृपः अंगना-
याः अपांगबाणानां लक्ष्यतां ग्राह्यतां स्वयं याति गच्छति
अपांगेन कटाक्षालोकनं कथम् तेनांगनानामपांगा-
लोकनमेव बाणाः तेषामितिवा अपांगो नेत्रप्रान्तः स
एव इतिवा किंविशिष्टः किरीटवदर्जुन इव विद्यायाः
धनुर्वेदस्य वैशारद्यं विशारदत्वं विज्ञत्वं दक्षतोपि यथाव
यत्नापि अपिविरोधे योर्जुन इव धनुर्विद्यापरागस्स
स्त्रीणामपांगबाणानां लक्ष्यः कथं स्यादिति विरोधः
अथवा स्वयमपांगबाणलक्ष्यतां याति न शत्रूणामि-
ति भावः केचित्तु अर्जुनस्तावच्छत्रूणां बाणलक्ष्यः अ-
यं तद्विलक्षण इति तन्न व्यतिरेकः ५ ॥ यद्यशो राज-
हंसस्य ब्रह्माण्डं पंचरायते ग्रासन्नीरायते वास्य शैल-
त्तीरवारिधिः ६ ॥ यस्य राज्ञो यशो राजहंसस्य पंचरा-
यते पंचरं भवति पंजरमिवाचरति यावत्का इत्याह
ब्रह्माण्डं जगदित्यर्थः अन्योपि राजहंसः पंजरे तिष्ठ-
ति अस्येदं यशः सकलं जगदुदरे तिष्ठतीति भावः अ-
स्य यशो राजहंसस्य प्रस्तावात् प्रशस्यतः क्षीरवा-
रिधिः क्षीरसमुद्रो ग्रासन्नीरायते ग्रासनीरमिवाच-
रतीति अनयोः क्रमं विहाय नीरमादन्नेक्षीरं हंसा-
पद्यानयेति जलासिक्तेन क्षीरे जलं परित्यज्य क्षी-
रं हंसो गृह्णातीति तज्जातिं जगदुदरव्यापकत्वेन तद्य-
शसा शत्रुः एतद्यशसा ब्रह्माण्डं व्याप्तमिति ६ ॥ अ-
श्रीविद्याशोभितो यस्य श्रीपुंजाद्वितीनीभिदा धाराप
तिरभावासीद्यतावदुरापतिः ७ ॥ श्रीकक्षान्त-
त्मीकान्तजान्हाज्ञाविशेषादस्य राज्ञः कामदेवस्य यतो
भिदा एतावानेव भेदः किंविशिष्टस्य श्रीविद्याशोभि-
नइति श्रीश्चविद्या च श्रीविद्या ताभ्यां शोभितस्य

ऽलयस्य श्रीविद्याशोभिन इत्युभययोगित्वादेकस्य॰
श्रीयुक्तस्य मुंजस्य स्यास्याद्वैतत्वमुक्तं कोभेद इत्याह ॰
अयंमुंजो राजा धारापतिरासीत् धारानगरी अवन्ति॰
स्तत्स्वामीत्यर्थः अयं तत्कामदेवो धरापतिः पृथ्वीपतिः
अन्तपतनगरीपतेर्मुंजात् सोविलक्ष इति सैन्याग्रकंद
मेतत्पो धारास्वगतिपंचके इवक्ष्यप्रधाने इतीति विश्वः
७ ॥ धर्मार्थकामान्भजता यथावदत्रबाधिनः अवंध्या
येन नीयंते सज्जना इव मार्गणाः ८ ॥ येन वा सवादिव
णाः अवंध्यासफलानीयंते सज्जना इवेति सहोपमेय
सज्जना अपि सफलानीयंते इत्यर्थः किंविशिष्टेन धर्मा॰
र्थकामान्भजता अपवर्गसहितपुरुषार्थवर्गस्थान से॰
वितेत्यर्थः विधानतिक्रमेत्यर्थः अत्रबाधिनः अन्याव॰
रोधिनः परस्परसंबधा इत्यर्थात्सज्जना इवेति निदर्शनो॰
क्तिरिके चन ८ ॥ दूषणध्वंसदक्षेणापुण्यसेतुप्रवर्ति
ना रामेणेव कृते येन जनस्थानमकाण्डकम् ९ ॥
येन जनस्थाने जनपदः अकाण्डकं काण्डशून्यं कृतेन वि॰
द्यते कारकाश्च तत्रथा रामेणापि जनस्थाने दण्डावि
शेषमकाण्डकं कृतमित्युभयविशेषण ॥ दूषणस्यदोष
स्य निराकरणे दक्षेण कुशलेन पक्षे दूषणस्य रावणस्य॰
ध्वंसे दक्षेणेति पुण्यापः सेतुबंधस्तस्य प्रवर्तकेन पुण्य
त्रिभुमनोदृश्यास्त्वो वेक्ष्यकृत धर्मयोरिति विश्वः पक्षे स
मुद्रबंधप्रवर्तकेनेति ९ ॥ भूरिलाभावभूतादिज॰
र्जितसंपदा भूमेः कृतवान्पालनं यस्तत्पाधर्मजन्मना
१० ॥ योयं राजा धर्मजन्मनाधिष्ठितेन तत्परस्य हपाः
उभयत्रेत्यर्थः उभयत्र समानविशेषणमाह भूरीति लमा॰
कीर्तिः पृथ्वी वा तस्या भूरिर्महान्योभारः तस्य साधके॰
नशितिः लाभ्योः लमेत्यमरः विशिष्टेन राज्ञा येनार्जुनेन
वा अर्जितासंपद्येन भूमेर्विस्तृतवानः पालयामितिपंत येन ॰

राच.
पाठी.
४
५

पदेशान्यो राजविशेषो येन भूमेरित्ति पंचमग्रंथे इति के
चन तिथिभेदानि ज्ञानशीलश्रीसर्वोश्च जय॰
न्तो चास्ति शाक्तनये जयते जय इति विग्रहः १९ ॥ यथास
र्वेषु देवेषु कामदेवो जगत्प्रियः तथा मनुष्यदेवेषु का
मदेवो जगत्प्रियः २१ ॥ जगतां प्रियो जगत्प्रियः जग॰
त्प्रिय इति वा श्रुतिस्मृत्यन्तरात्सर्वेषु देवेषु कामदेवः
कन्दर्पो यथा तथैव मनुष्यदेवेषु राजसु कामदेवना॰
मा नृपो जगत्प्रिय इति २१ ॥ आदित्यस्यान्ववायो जय
ति रघुपते जन्मनो ज्रेऽभिव श्री लस्याम्य सोमवंशः अय॰
श्लेभितः पाण्डवानां यशोभिः धवलितसाम्यमध्ये सरहू
धरणीसंभवोऽप्यन्ववायो यस्मात् लेकारभावं भजति कृ॰
तधिया कामदः कामदेवः २२ ॥ आदित्यस्यान्ववा॰
यो वंशः सूर्यवंशो जयति उत्कर्षेण वर्तते किं विशिष्टो
रघुपते रामस्य जन्मना उज्रे विता वधिना प्रकाशिता
श्रीरघस्य तथा सोमवंशोऽपि तत्सूर्यवंशात्तुल्यतो अय॰
ति पाण्डवानां यशोभिः धवलितः सरहूधरणीसंभवोऽपि वं
शः कारदववंशः अयतत्साम्य तयो राघवपाण्डववंशयो
स्साहृश्यं धत्ते धारयति तयोर्धिमितिपाठान्तरं तयोर्यो॰
धिसाधिक्यमित्यर्थः यस्मात् लेकारभावं अलेकारत्वं
कामदेवो नाम राजा भजति इति हृत्तधियां पण्डितानां
२२ ॥ केचिद्धाने शुधीवा स्समरभुवि शत्रुः केचिदन्ये दया॰
यां कर्णाध्याः पार्थसाध्याः स्वचरपतिसभाः पूर्वमास॰
न्नरेषु तेषां तेषां च तेषां मापिव वहति धुरं सांप्रतं नावद
स्यामेकः श्रीकामनामा जलनिधिलहरीमेखलायां॰
धरायां २३ ॥ पूर्वं पुरा राजानः एवमासन् अभूवन् त॰
थाहि केचित् क्षोणीपा दानेः श्रीरा उत्कृष्टाः स्समर्था इति
यावत् केचित्यार्थप्रभृतयः समरभुवि संग्रामभूमौ॰
प्रवीणाः अन्यो खचरपतिसभा ग्रहराजा रघो दयायां॰

करुणायां प्रवीणा इति यद्वा के ते इत्याह केचिद्राजा
नो दाने धनादिवितरणे प्रवीणाः प्रवीणाः प्रकर्षेण दा
नेन खण्डनेन वा दोःखण्डनेन वा इति धात्वर्थानुसा
रात् भुजायाः पटुतरा इत्यर्थः केचित्समरभुवि प्रवी
णाः अस्मिन्नुत्तरस्यायां करुणायामिति कर्णाद्याः
धेयप्रभृतयः पार्थप्रख्याः अधिरथप्रभृतयः केचिदि
ति विवरणे वचने निम्नगा इति विस्तराकाशे चरंति ख
चरग्रहा नक्षत्राणि वा तेषां पतिः सूर्यः चंद्रो वा ते
भुवि अग्रे येषां ते तथः सूर्यवंश्याः सोमवंश्याश्च वा इत्य
र्थः सांप्रतमिदानीं तस्यां धरायां पृथिव्यां पक्षपव
कामदेव नामा लपलेषां कर्णादीनां राज्ञां धुरं वहति
धारयति दाने रस्यां संग्रामे च यत्पक्षपवप्रवीण इति ते
भ्योपि विलक्षणोयमिति भावः जलनिधीति जलनिधिः
समुद्रस्तस्य लहरीतरंगमाला सैव स्रक् पुष्पमाला
तां धारयति बिभर्तीति या सा तथोक्ता अनेन मध्य
देशात् प्रवचनेविरुद्धो सोमपो ब्राह्मणानां सारोदा
मत्येमृत्योः सुरपतिसदोसमण्डनेमानवत्याः जेतार
भूमिजेयंती प्रपुरमथनश्रीपदांभोजभृंगाः सोपि तस्या
पतिस्त्रिनेत्रः स्वकुलकुलगिरिं योजनलेभे तपोभिः सोर
पि तस्याः पृथ्वीपालः त्रिनेत्रः मत्तावलम्बाने त्रयवा
न् अथवा त्रिनेत्र इव पूर्णकार इवेति लिंगोपमेयमिति के
चित् साहचर्यप्रतिपादकं हेतुमाह यइति योयेन
तपोभिः स्वकुलकुलगिरिं अनुलेभे अनुप्राप यस्य
स्वकुलं कुलगिरिमिव कैलासमिव स्वकुलमेव
कुलगिरिमिवा कुलं जनपदे गेहे सजातीयगणेपि चे
ति मेदिनीकारः तं विधिनापि अनेनेति मध्यदेशा
त्कं गायत्रनयो रतवै दिदेशादानेना अनेन यत्कैलासके
बामित्याह ब्राह्मणानामिति प्रवचनविरुद्धां वेदता

रा.घ.
पां.वी.
५

5

नो अथप्रवचनं वेदे प्रकृष्टवचनेपि चेति मेदिनीका
रः सोमपां कृतसोमलतापानां कृतज्योतिष्टोम
त्वात् श्रोत्रियेति मत्यभूत्याश्रउपहृष्येण स्वरपति
मरसः इन्द्रसभायाः आरोहा आरोहणकर्ता योग्य
त्वात् मानवत्याः मनस्विन्यो मण्डनमलंकारः भूमे
र्दिग्विजयेनेति शेषः जयंती पुरेन गारेयः पुरमथनदे
वः हरस्तस्य श्रीपूजकं यत्पदारविंदं तस्य भृंगाः भ्रमर
राणीति स्वापः ५५ ॥ यं चत्कांची मनोज्ञाः सुवलि
तमधुराः कुंतलैः सल्लसंत्याः उल्लसंत्यो हारपोभांदृत
कारकटकाः कांतिमहेदिमध्याः अंगश्रीभङ्गिभाजः
परिमिलदलकाः प्रोल्लसत्काममूर्पाः सेवंते तमनो
ज्ञाः प्रतिदिनमबलाश्रेणयः तोणयश्च ५६ ॥ अत्र
दिने प्रत्यहं समंतात्सर्वतः अबलाश्रेणयः अंगनापंक्त
यः तोणयो भूमयश्च तं राजानं सेवंते भजंते उभयविशे
णानि यं चवदितिन्यंजती चलंती लाकांची स्वद्दचटि
कादेशविशेषो यानवा मनोज्ञा मनोहराः सुललिते
न शोभनेन ललितेन विलासेन मधुरा मनोहराः पक्षे सु
ललिता मधुरा नगरी यत्र ललितं हावभेदस्मा ललितं
वाहितेत्रिषु लिंगविशेषः तथा कुंतलैः केशविन्यासैः उह
संत्यः पक्षे कुंतलैः देशविशेषैः कुंतलाः सुजनपदे
हेलो बालश्च कुंतल इति विश्वः उल्लसंत्य इति हारेण
प्रसन्ना हारेण शोभां समेत्यो वर्धयंत्यः पक्षे हारस्य देश
विशेषस्य शोभां भामिनि हारो मुक्तावली देशा इति मेदि
नीकारः धृतकरेण हस्तेन कटकं वलयं याभिः पक्षे
धृतः करो राजग्राह्यभागो यत्र एवंविधं कटकं सान्नध्य
त्यमरः करो वर्षोपलेरश्मौ पाणौ ग्राह्यभग्रुत्ययोरिति
विश्वः कांतिमती इति कटकं वलयं स्मानावि
कांतिमत्कोलियकंचेदिवत्किमि

विशेषवन्मध्यं यासामिति प्रत्येकांतिमत् वेदिम
ध्यमेतद्वेदिर्यत्र तथा वेदिः प्रशस्तता
भूमिर्मध्यमध्यदेशः वेदिः किमिव विशेषस्या हृश्येत ल
तभूतलेऽपि तिविस्तः शृंगोति शृंगाश्रियः शृंगालस्याः-
भंगिभजते यास्ताः तथा प्रत्येके शृंगादेशविशेषः प्रती-
ति परितोमिलत् अलकः शोभनकेशविन्यासः प
त्ते परिमिलंती अलकानगरी यत्र शोल्लसदिति प्र
कर्षेणोल्लसत्काममति पूर्यति नकामनाविषयं वा-
गौरवं यासां तास्तथा प्रत्येके देशविशेषः कामरूपः
२६ ॥ कूर्माकारं चरणयुगलं धूतदिग्दंतिशुंडा-
दंडाकारं भुजयुगमपि व्यक्तनागेंद्रशोभम् प्रायः पृ
थ्वीधरणविषये तत्समर्थान्यदार्थानेकीकृत्य त्रिभुवन
स्रष्टा निर्मिता यस्य मूर्तिः २७ ॥ कूर्माकारेति यस्य
चरणयुगलं कूर्माकारं कूर्मसदृशं पृष्ठोन्नतमित्य-
र्थः तदुक्तं सामुद्रिके कूर्मोन्नतौ च चरणौ मनुजेश्व
रस्येति केचित्कूर्मस्याकारो यत्र रेखादिना कूर्मा
कारत्वं योगादिति यस्य द्वे धूतदिग्दंतिशुंडादंडा
विति धूतो निरस्तो दिग्दंतिनः शुंडादंडो याभ्यां तौ
तथा यस्येति सर्वत्रानुषज्यते भुजयुगलमपि बाहु
द्वयमपि व्यक्तनागेंद्र व्यक्तानागेंद्रवच्छोभा यस्य तत्त-
था तत्सदृशमित्यर्थः आजानुलंबित्वेन दैर्घ्ये हा
स्तिकसमानं यद्वा नागेंद्रस्य हस्तिनः शुंडादंडे
लक्ष्यते तदुक्तं सामुद्रिके करिकरसदृशौ वृत्तावा
जानुलंबिनौ पीनौ बाहू पृथिवीशानाम धर्मिणां रो
मशौ ह्रस्वाविति प्रायो बाहुल्येन यस्य मूर्तिः शरीरं त्रि
भुवनस्रष्टा ब्रह्मणा स्रष्टा पृथ्वी चरणविषये भूधार-
णार्थं तत्समर्थान्यदार्थानेकीकृत्य विशाकलितानि
तत्तनया रुच्यवर्तीकृत्य निर्मिता स्रष्टेति काप

ण्येन विशिष्टेन कारणविशेषमानादिति कुमारादि-
ग्वारणनागराज्ञानां त्रयाणां दृष्टीधारकत्वादिति
२७ ॥ कस्त्राता कामदेवः समरविजयिनां को वशी का-
मदेवः कस्त्यागी कामदेवः सरसकविगिरां किंपदं-
कामदेवः कस्सेव्यः कामदेवः श्रितभरणविधौ कः
क्षमी कामदेवः प्रश्नानामेकएवप्रतिवचनमहो राम-
वत्कामदेवः २८ ॥ क इति एवंविधानां प्रश्नानां प्रति-
वचनमुत्तरमेकः कामदेव एव नान्यः इति रामवत् ।
राम इवेति तेन तुल्यं क्रिया .. प्रश्नरूपमाह
कस्त्रातेत्यादि त्राता पालकः कः कथ्यते प्रश्ने काम-
देव एवोत्तरं ज्ञायते नान्यादिति यथा कस्त्राता इति
प्रश्ने राम इत्युत्तरं कश्चिद्ददातीति एवं समरविजय-
नामिति सैनापिकानां मध्ये वशी क इति प्रश्ने काम-
देव एवोत्तरं कस्त्यागी त्यागवानिति दातेति वाच्यः
यद्यपि त्यागदानयोरौपाधिकभेदस्तथापि सामान्ये-
नोपन्यासः तमभेदस्वमिति त्यागस्वरूपपरस्वत्वाप-
त्तिर्न विवक्षिता दाने च परस्वत्वापत्तिर्विवक्षितेति एवं
यागहोमपूजादावपि विशेषोऽस्ति न दत्तवित्तभया-
च्चलितवित्तः नहि वेकापि काम एव तद्विवरणमिति ।
सरसकविगिरामिति सरसानां शृङ्गारादिरसयुक्ता-
नां कविवाणीनां परं स्थानं क इति प्रश्ने कामदेव इति
सच सेवनीयः सेवायोग्यः क इति प्रश्नोत्तरं कामदेव
रुत्तरं श्रित इति श्रितग्राश्रितः सेवकादिः तस्य भ-
रणविधौ कः क्षमीति प्रश्ने कामदेव इत्युत्तरं हानितो द
दपरिताविनिविस्रः २८ ॥ जित्वा शत्रूनवमभिवि-
यातो धामहर्म्याग्रलनाभावोदैदाह्लिनगतयोलो
लमालायतनास्याः प्रतप्रेवलक्षीफरकनकस्तम्भयो-
भानं जोमलक्ष्मीर्मतिन्यो विरपतिहृत्कंपस्मीनधज

त्वम् १९ ॥ सीमंतिन्योविलासिन्यो यस्यमीनध्व
जत्वंकन्दर्पत्वंहृष्टाविदधति प्रसेति मीनरूपोध्व
जोयस्ययोगिकंनाममीनरूपध्वजस्यभावान्मीनध्वज
त्वमस्येतिगोणत्वादिति कोसित्याह निजैरंगैरिति
स्वशरीरैरित्यर्थः किंविशिष्टैः प्रांतेसमीपे प्रेंखत्
चलत् शफरोमत्स्यविशेषोयत्रएवंभूतोयः कनक
स्तंभः तदच्छोभायेषांतैरिति अन्योपिध्वजः कनक
दण्डेनिबध्यते मीनोपिकनकदण्डध्वजः सएवनस्ये
ति तात्पर्यवस्तुतः कन्दर्पसाहृदयमन्नाम् कृतएवमि
त्याह हर्म्याग्रलग्नाइति हर्म्याग्रेहर्म्यशिखरेलग्नाः
स्थिताः सीमंतिन्योइति तस्याः किंविशिष्टस्यशक्तिजित्वा
स्वधामगृहमभिविष्टतः अतएवभावोद्भेदाकुलितगत
यः तद्दर्शनसंजातसात्त्विकभावान्मन्थराः स्तंभोपमाः
स्थिराइति स्वेदः स्तंभोथरोमांचः स्वरभेदोथवेपथुः
वैवर्ण्यमश्रुपतनमित्यष्टौसात्त्विकागुणाः इतिभर
तोक्तम् अकुलिगतयइतिपाठांतरम् भावोद्भेदेन अ
कुलिताऽगतयोयासांमिति लोलंचपलंमालावत् स
ग्विवायतं दीर्घमक्षियासांतास्तथोक्ताः लोलमाना
निचंचलानिदीर्घाणिचक्षूंषियासामितिवालोलमानेति
पाठः चक्षुषोमीनतुल्यत्वंराजदर्शनसंजातस्तंभानां
तासामंगानांधारिष्णुमितिस्फुटात्रमीनध्वजेतनि
रुपस्थितिमिति २० ॥ योषावेशोविशदधरहृदेकेश
मोलौकुगर्भःपाश्ववासः पार्वशिविरंपार्वतत्वाद्रिचोलः
पापेषाश्चाम्लाकवेनविधिवीरणकल्पदासत्रां यच्छद्रूपेण
भवतिभुवनेजीवनोपायवर्गः २१ ॥ भवनेलोकेयस्य
पाद्रूपेणोदिवांजीवनोपायवर्गः कार्प्पण्यसमूहः पवमने
नप्रकारेणभवतीतितन्निर्दिशति योषायावेशालंकारेण
आकारेणवायोषावेषः स्त्रीरूपधारित्वंस्त्रीणांवेष्मना

रघु०
पो० वी
७

त् अवध्यासिद्धियोगाज्जंसिद्धर्थम्पोनिरानैरपि शोषायाः
वेशायचेतिवाविषधरगृहेपातालेतस्यवेशः स्त्रीअध्या
सिंहसीमामवधात्वाद्वइतिशेषः यद्वाविषधरगृहेक
लत्रंममस्वामिव यदित्वयाकार्तेवमंतदाविषमत्ताणे स्त्री
वधंदास्यामीति विषधरवत्ताणादेवरूपत्वमिति गृहेगृ
हास्त्रिषुभूमिवलेचेपिवसथनीतिमेदिनीकरः विषधर
वेगृहेवा यतिसंगमत्वाविलवद्गुहामितिविषधरगृहत्वा
त् वारदहमराणवासित्वात् केशमोक्षइतिकेशस्यवं
चस्यमोक्षः मोक्षणंत्यागोयचेति मुंडनेवाव्रतादिधार
णालिंगादवधात्वाख्यापनमिति चेतिनोऽस्यवधत्वादिति
केशमोक्षःकेशाबंधनामितिवा अभ्रगर्भइति जलप्र
वेशइत्यर्थः शष्पग्रासइति शष्पनवतृणाग्रासःक
वलं भक्षेनत्यजग्रहणामिति पशुरूपत्वाख्यापनमि
वा शबरशिबिरमिति तत्यवेशइतिशेषः शबरःपर्वत
वासी तस्यशिबिरोवस्थानमिति यथाशबरःपर्वते
वसति तथासौपर्वतवासीत्यर्थः यद्वाशबरःचंडिकाप
तिः शिबिरमितितत्पतित्वरूपत्वाज्जटाधारणादिति चं
म्लेच्छभेदेपानीयेशबरश्चंडिकापतौ इतिमेदिनीकारः
शेखरत्वमिति शबरःसमृगविशेषस्तत्वकचर्मनिचो
रः पमस्तुदोषस्यमतथाशबरत्वाद्रिचोलेवाजीवनो
पायवगोइति शबरोदेत्यहरिणामतस्यशैलनगरइति
मेदिनीकारः तद्वारोगेनव्याधरूपत्वप्रकाशनात्कम
णाया अवधत्वेतद्दृशाइति वा शाणेशावितिशाणेशः ह
लयोः शाखाशाः अश्मल्पाः कवलनविधिः कवलनवि
धानेशावेइली प्रवेशनामिति काष्ठगलेचदास्ताबज्ज
नाधारणामें रोपणांगलपाशत्वम् ॥ ४४ ॥ विशिखग्नी
नाज्ञनेवपादाभिः स्तुतिप्रतिष्ठाप्रकृपार्थहानिः सन्ना
गविलाववलीरमानिर्धभागनीश्रीर्भजतेभिरामा १०

यं राजानं भारश्रीर्भजते सेवते स भारतस्तस्य व्यासोक्ताय
न्यविशेषस्य भरतापत्यविशेषस्य वा यद्दिष्टं दैवी
भारतस्य भारतवर्षस्य वा व्यासर्षिभाषितग्रन्थे जम्बु
द्वीपे च भारतम् साधारणानि विशेषणान्याह विशि-
ष्टगीतेति विशिष्टा गीता उपनिषद्विशेषो यत्र पक्षे
विशिष्टेन सज्जनेन गीता प्रशंसिता सो विशिष्टगीतेति
राजलक्ष्मीरपि विशिष्टेन महत्तरेण गीतेति गीतेश-
छित गायतेरिति विग्रहः विशेषेणाशिष्टाः आचार-
वान् गीतः ख्यातो यत्र वा वेदप्रमाणस्वीकर्तारो विशि-
ष्टशब्दव्याच्यते बुध इति विशिष्टा ग्रन्थेभ्य उत्कृष्टा गी-
ता ख्याता चेति वा धृतेति धृता वेषास्य वेषात्र च वित
स्त्रीभिर्यत्र पक्षे धृतवेशस्तानुजानयस्य वा द्वीभिर्य
या सा तथोक्ता अथमपि स्ववंशप्रकाशक इति प्र
सिवंशः कुले वेणौ वंशावयववर्गयोरिति मेदिनीका-
रः धृता वेशेन वेणुनाडीभिर्यं भरतलक्ष्म्या सा तथा
धृता वंशप्रकारधर्मेण नाडीभिर्यत्रेति श्रुतिप्रतिष्ठेति
श्रुतौ वेदे प्रतिष्ठा ख्यातिर्यस्याः सा तथा उपनिषद्विशे
षत्वात् श्रुतौ श्रवणे प्रतिष्ठा इति यत्र गाशकरूपत्वा
त् पक्षे श्रुतौ वेदे प्रतिष्ठा यस्याः हिरण्यवर्णां त्यादि ऋ
ग्वेदे तथोक्तिः राजापि श्रुत्या वेदेन प्रतिष्ठितः प्रति-
ष्ठा गौरवे स्थिता वितिविग्रहः श्रुतिः श्रोत्रे च तत्कर्मणि
म्नाय वार्तयोरिति मेदिनीकारः श्रुतावाग्वादेन प्र-
तिष्ठा यस्या इति पक्षान्तरे प्रकृतार्थस्य धर्मादिचतुष्ट-
यस्य स्तुतिः कृता येन च सा तथा एतत्कार्येन धर्मार्थ
स्तुतिः पक्षे प्रकृतार्थस्य प्रकृतस्य प्रयोजनस्य वा स्तुति-
कृत्यान्निर्यस्याः सा तथा पोषकजनकइत्यर्थः पक्षे प्र-
कृताणामर्थस्य धनस्य स्तुतिर्यस्याः सा तथा प्रशस्ताना-
मभिधेयेऽपि निष्ठेति च प्रयोजने सारोक्तः विधिविधये-

रा.च्चु.
पं.वी.
८

न्द्रकारणाव स्वास्थितिविग्रहः प्रकृष्टविषयस्य स्तुतिर्य-
त्रेतिवा कर्मभूमित्वाज्ज्ञानतावाप्तस्येति सन्मार्गविस्ता
रवतीति सत् श्रेष्ठो यो मार्गस्य विस्तारो यत्र ता दृशी
पक्षे सतः सदाचारस्य यो मार्गः प्रवर्त्तनं तद्विस्तारवती मा
र्गो मृगमदे मार्ग प्रभेदत्वे पणाध्वनोरिति विश्वः स्वजातिः
शोभना जातिर्ब्राह्मणत्वादिर्यत्र शोभनानां पुरुषार्थादी-
नां जातिर्जन्म पक्षे स्वजातिकस्तूरिकावत्त्वं प्रावती पक्षे शो
भना जातिर्यतः सज्जातिः स्याद्भ्रात्री सूरी बुद्धिमान्
अभिरामेति अभिः भयशून्यो रामो रामभद्रो यत्रेतिवा
पक्षे अभिरमतीत्यभिरामः रामो यत्रेतिवा अत्यन्तम
भिरामोऽस्ति अथवाभाप्रभादीप्तिभिः रतेसंयोगः श्री
लक्ष्मीः सततं सेवतेऽपि द्वन्द्वसमासे परवल्लिङ्गतया-
भा रत्नश्रीरिति त्रूपविशिनष्टि विशेषतः शिष्टेन मान्ये
न साधुजनेन वा गीता पक्षे विशिष्टगीतिर्गानं यत्र तत्र-
थालिङ्गव्यत्ययेन विशेषणं पक्षे विशिष्टेन पण्डितेन गी
ता स्तुतेति धूतेति धूता विश्लिष्टा दीप्तिर्यया पक्षे वंश-
स्य वाद्यविशेषस्य दीप्तिर्यत्र पक्षे धूतवंशस्यान्ववायस्य
दीप्तिः प्रकाशनं यत्रेति श्रुत्येति श्रुत्यैव श्रवणमा-
त्रेण प्रतिष्ठा यस्याः सा तथा पक्षे श्रुतौ कर्णे प्रतिष्ठा य
त्र श्रूयते पवनपदं वैनापि हृदयपतन इति लिङ्गव्यत्ययः प-
क्षे श्रुतौ वेदे प्रतिष्ठा यस्या इति पुरुषेति पुरुषार्थस्य
पुरुषप्रयोजनस्य स्तुतिः कत्यानिर्यत्र सा तथा पुरुषार्थ
स्य कामस्य स्तुतिर्यत्र पक्षे पुरुषाणां मध्ये श्रेष्ठस्य पुरुषस्य वा
स्तुतिर्यत इति सन्मार्गेति सतः श्रेष्ठस्य मार्गस्याध्वनो वि
स्तारो यत्रेति पक्षे सतः श्रेष्ठस्य मार्गस्य मृगमदस्य वि-
स्तारो यत्र पक्षे सतां मार्गस्य विस्तारो यत्रेति स्वजाति-
रिति शोभना जातिः तस्या विस्तारो यत्रेति स्वजातिः
जातिः प्रशस्ता विशेषो यत्र शोभना जातिः पद्मिनीत्या

दि स्त्रीजातिविशेषो वा यत्र पद्मे शोभनजातिः वंश्ये
यत इति अभिराममनोहरोत्यर्थः पद्मे अभिरामे तत्र
तिलिंगव्यत्ययः पद्मे अभिरामयति सौन्दर्यादिशोभति
अपवे विलासभयान्नलिलिखितम् २९ ॥ छत्रचंद्रमसि
यस्य निर्मले लोकतापमपहर्तुमुद्यते कुड्मलीभवति
वैरिभूभृतामातपत्रशतपत्रसंहतिः ३१ ॥ यस्य राज्ञः
छत्रं चंद्रमाः छत्रचंद्रमाः तस्मिन्निर्मले स्वच्छे लोका
नां तापं संतापं निवारयितुमुद्यते सति वैरिभूभृतां वि
पक्षराज्ञां आतपत्रशतपत्रसंहतिः पद्मसदृशाच्छत्र
पंक्तिः कुड्मलीभवति संकुचिता भवति चंद्रोदयेन प
द्मानां संकोचो जायते इत्यौचित्यं एतस्य छत्रे उद्यते सति
विपक्षाणां पराजयो भवति अतः संकुचनमिति प्रता
पातिशयार्थमुक्तमिति ३१ ॥ औदार्ये रघुनाथधर्म
सुतयोस्तत्सोदराणां पुनः सौभ्रात्रे पतिदेवताव्रतविधौ
पृथ्वीसुताकृष्णयोः श्रीरामायणभारतार्णवकृते बा
ख्यानवत्सेष्वति श्रेयान्सं प्रति कामदेवनृपतिः कौतू
हलीवर्तते ३२ ॥ अयं कामदेवनृपतिरिदानीं कौ
तुकवान्वर्तते इति औदार्ये इति रघुनाथस्य रामभद्र
स्य धर्मसुतस्य युधिष्ठिरस्य औदार्ये उदारत्वे तद्वर्णन
इति भावः उदारस्य भावः कर्म वा औदार्यमिति अन्य
सापि च तत्सोदराणां भरतादीनां भीमादीनां च सौभ्रा
त्रे सौहृदे च तथा पृथ्वीसुतायाः सीतायाः कृष्णाया
द्रौपद्याश्च पतिदेवतारूपस्य नियमस्य विधाने करणे
तयोर्विवाहे वा तथा रामायणं वाल्मीकिरचितं भा
रतं व्यासरचितं उभयोरगाधत्वेन तौ समुद्राविव तत्र कृ
तेषु प्रतिपादितेषु आख्यानरूपेषु कथारूपेषु श्रा
तिश्रेयान् श्रेष्ठो नृपतिविशेषणम् ३२ ॥ तानि
न्ते भवति श्रियं विपादयन्नानन्दमहीपय ध्यायवेमति

राघ॰
पं॰वी
५
9

पादकं वितनुते वाचां समीचीनतां प्रत्यर्थीकृतलेखपा
दार्थनिवहं ख्यातिं प्रतिष्ठाप्य च त्वत्तः कोऽन्यपतेर्वि
नोदविभवः सत्सूक्तिगोष्ठीरसात् ॥ ३३ ॥ सतां सूक्तिः
श्रेष्ठवाणी सती वा सूक्तिः तया या गोष्ठी संलापः प
रस्परालापः तत्र रसात् दत्त्वा दातिशयाद्वा संगादिति
यावत् न्यपतेर्विनोदस्य उद्वेगापनयनस्य सूक्तविशे
षस्य विभवः प्रभुत्वमन्यः कोऽस्ति अपितु न कोऽपि तस्मा
त् त्यक्तः गोष्ठी सभासंलापयोः स्त्रियामिति मेदिनीका
रः रसोऽनुरक्तौ मात्सर्ये इति विश्वः कृतमेवमित्याह ज्ञा
नं जृम्भयति वर्धयति विशिष्टतां प्रापयतीत्यर्थः सद
सद्विवेकात्मकं च गोष्ठीरसस्यैव कार्यत्वमिति श्रिय
मिति श्रियं लक्ष्मीं वाणीं वा विशदयति विशदां करो
ति प्रकाशात्मकं प्रापणात् आनन्दमुद्दीपयति उज्ज्व
लं करोति स्वावहं तज्जननात् मतिपाटवं बुद्धिकौशलं
माधत्ते प्रहेलिकाद्युद्बोधनात् पदार्थनिवहं शास्त्राना
मभिधेयसमूहं प्रत्यक्षीकृतं ज्ञापयति वाच्यवाच
कावगमात् ख्यातिं प्रसिद्धिं प्रतिष्ठापयति प्रतिष्ठा
विधाता यशो गुर्वीकरोतीति प्रतिष्ठा गौरवे स्थितावि
ति विश्वः श्रीर्वेशरचनाशोभाभारतीषु च संपदीति प्र
काशः केवित्तज्ञाने हेयोपादेयविषया बुद्धिः सा जृम्भ
यति प्रस्तारयति ततश्च श्रियं शोभां कान्तिं तेजो विश
दयति दानादीनां फलीकरणात् श्रियं लक्ष्मीमिति
वा ततश्चानन्दमुद्दीपयति वा निःश्रेयसाधिगमनेना
नवकर्मणाद्धेतुत्वेन स्तुतः ततश्च मतिपाटवमादत्ते
मनेनामनश्च श्रेष्ठात्पदत्वमादधाति आत्मविषयान
मिति हेतुत्वात् वाचां समीचीनतां सत्यतां वितनुते
कनेष्वाने स्वपात् ततश्च निरवद्यामनादीनां पदार्थनि
वदत्प्रमाणादिपदार्थानां स्मातात्कृते ततश्च ख्याति

मात्मनः साक्षात्कारं प्रतिष्ठापयति स्थिरीकरोतीति पु
नःपार्थश्चेत्स्पृष्टावगमोप्यत एव भवति २३ ॥ तस्मा
वदातैः कविसूक्तिसूत्रैः संस्यूतनानागुणरत्नराशेः
विनोदहेतोः कविराजसूक्तिनिबन्धनद्रव्यमिदं विधत्ते
२४ ॥ कविश्चासौ राजा चेति कविराजः सूक्तिः प्रति
तविशेषः कविराजेषु सूक्तिरिति वा उत्प्रेक्षा मम वस्तु
मासः सदृदमग्रे वक्ष्यमाणं निबन्धनहृदं निबन्धकर्म
रामायणभारतरूपकथाद्वयमेकरूपेण वाक्येन भास
माने विधत्ते विदधाति किमर्थमित्याह तस्य राज्ञः का
मदेवस्य विनोदाय प्रीत्यर्थं किंविशिष्टस्य कवीनां सू
क्तिसूत्रैः शोभनोक्तिरूपैः सूत्रैरवदातैर्विशुद्धैः संस्यू
तमेकत्रीकृतं ग्रथिता नानागुणाः काव्यालंकाराः
श्लेषाभयएव रत्नराशयो यस्य सततथा पुञ्जकृतवगणाद्र
तिव सूत्रं तं रत्नव्याख्यायोरिति विश्वः स्यूतः खचितव
कइति मेदिनीकारः सीवनं ग्रथनं सूत्रेणैव क्रियते
इति पराक्रमम् २४ ॥ श्रीरामायणमाणिक्यं भारत
सुवर्णमण्डितं नकस्य कुरुते लोके विस्मयोल्लासिमान
सम् २५ ॥ श्रीरामचरितं माणिक्यमिव भारते पाण्ड
वचरितं सुवर्णमिव तेन मण्डितं संबद्धं सत् रामायण
माणिक्यं कर्तृ कस्य मानसं चित्तं विस्मयोल्लासि
आश्चर्योल्लासितं न कुरुते अपितु सर्वस्यैव कुरुते इति
इति अथ च माणिक्यं सुवर्णमण्डितं हिरण्यखचितं सुवर्णे
गलीयसंगतं वा मानसं सर्वस्यैव विस्मितं करोतीति वै
चित् श्रीरामायणमाणिक्यं भारतसुवर्णमण्डितमिति
समस्तमाकः तत्र श्रीरामायणमाणिक्येन भारतसुव
र्णेन मण्डितेन संबद्धं यन्निबन्धनमिति प्रस्तावेन लभ्यते
तत्कस्य मानसमेव न कुरुते इत्यर्थः सर्वथोपादेयता
मेतेनास्मिन्निबन्धस्य भविष्यतीति भावः प्रायः प्रकरणे

नविशेषणविशेष्ययोः परिहृत्या क्वचिन्नद्व उपमानो
पमेययोः प्रायइति अग्रिमश्लोकेन महान्वयः म॰
याकरमकं काव्यं विधास्यते विधातुमारभ्यत इति न॰
वप्रकारमाह प्रायइति क्वचित्प्रकरणस्य प्रस्ताव॰
स्यैक्येन ··· प्रकरणात्प्रस्तावादैक्येन वर्णनइति॰
वा विशेषणविशेष्ययोः परिहृत्यापरिवर्तनेन क्ववि
त् एकत्रयद्विशेषणं तस्य विशेष्यत्वमपरस्य विशेष्य
स्यविशेषणतेति क्वचिदुपमानोपमेययोः परिहृत्या॰
येदेवान्यत्रापि उपमेयम् २३ ॥ क्वचित्पदैश्च नानार्थैः
क्वचिद्वक्रोक्तिभंगिभिः विधास्यते मया काव्यं श्रीरामा
यणभारतम् ॥ २४ ॥ क्वचिच्च नानार्थैः पदैरित्यन्या
न्यकार्यवाचकैरित्यर्थः क्वचिद्वक्रोक्तिभंगिभिः वक्रो
क्तीनां विवर्तनैरितिवा एवंप्रकारेण रामायणभारतंवा
यवपारसीयकाव्यं मया विधास्यते २४ ॥ परमेक॰
मपिश्लिष्टमेव वक्रं भूयान्परिश्रमः कथाद्वयैकनिर्वा॰
हः किं धराधिपतोधिकम् २५ ॥ परमितिपदं वाक्य
स्तमिदं नवाश्लिष्टं श्लेषालंकारयुतं वक्रमभिधानं
महान्परिश्रमो भवति अतो दुष्करत्वेनेत्यर्थः धराप
तेः पृथ्वीपतेः कामदेवात्किमधिकमपि न तु नोधि
कं न किमपि धातुं महापरिश्रमो भवति अतो दुष्करत्वे
नेत्यर्थः इति कथा कथाद्वयैकनिर्वाह इति ह॰
नगाभं विशेषणं कथाद्वयस्य रामायणभारतरूपस्य
केयन एकवाक्येन निर्वाहुर्निर्वाहकस्य न त्समासिक
तेरित्यर्थः कथाद्वयैकनिर्वाहे महान्परिश्रम इति भावः
विनकर्ताहीन प्रश्नज्ञान्मा दोषादिकेचोक्तम् इति प्राह
प्रकाशः काव्याभरणे श्लेषलक्षणं एकरूपेण वाक्य
नद्वयोर्मलयेण यच्च सर्वज्ञैः श्लेष इत्यभिहितः प्रकृ
तिप्रत्ययस्याहो विभक्तिवचनाश्रयात्पदे भाष्यभोचे

निपूाहूस्लेषामंवंकि ष्ठडिति उदाहरणंतत्रव्यक्तीभवि-
ष्यति ५५ ॥ श्रीमद्रामायणंगंगाभारतेसागरो महान्
तत्संयोजनकार्यज्ञौकविराजभगीरथो ५६ ॥ श्रीम-
दिति श्रीमद्वाल्मीकिकृतंरामायणं श्रीरामचरितंगंगेवभा-
गीरथ्येव पवित्रहेतुत्वात् भारतंपांडवचरितंसमुद्रइवनव-
गाह्यत्वात् उभयत्रोभवसामर्थ्येनेमेल्पादिगुणेनवा ग्रह-
रूपकमिदं तयोःसंयोजनकार्यज्ञौसंमिश्रणकार्यज्ञप्ता
ज्ञौकविराजभगीरथाविति रामायणभारतयोः संमि-
लनकर्ताकविराजः गंगासागरयोः संमिलनकर्ताभगीर-
थइति क्रियासाम्यमत्रेतिकविराजोभगीरथइत्यर्थः
५७ ॥ स्वबंधुर्बाणभट्टश्चकविराजइतित्रयः वक्रो-
क्तिमार्गनिपुणाश्चतुर्थोविद्यतेनवा ५८ ॥ स्वबंधुःवा-
सवदत्ताग्रन्थकर्ता बाणभट्टःकादंबरीकारः कवि-
राजोयंग्रन्थकर्ताचेतित्रयःकवयः वक्रोक्तिमार्गेश्लेषा-
त्मकोक्तौकुशलोनिपुणः नान्यश्चतुर्थउपपद्यते तत्रकु-
शलोनान्यइत्यर्थः ५९ ॥ रम्यारामायणीयेवाभारती
सेवभारती अर्धनारीश्वरमयीमूर्तिरेकेवशोभते ६०
याभारतीवाणीरामायणरूपासैवैकारस्यामनोहारि-
णीभारतीवाणी भारतीभारतरूपा अर्धनारीश्वरमयीउभ-
यरूपघटिताएकामूर्तिःशरीरमिवशोभतेराजतामि-
त्यर्थः अर्धनारीश्वरीमयीतत्तुल्यव्यापनाद्यमिति उ-
भमेवतेनसाम्यमिति ६१ ॥ एकत्रचेद्भानपरस्तदन्य-
स्यपृष्ठेपरस्मिन्स्फुरदुल्लभासः अयंसुमेरोरनुयाति
लीलांकथाद्वयाश्चर्यमयःप्रबंधः ६२ ॥ अयंप्रबंधः
कविराजकृतग्रन्थविशेषः सुमेरोःपर्वतस्यलीलाम-
नुयाति अनुगच्छति किंविशिष्टः कथाद्वयेनरामायण-
भारतरूपेणाश्चर्यमयः आश्चर्यहेतुः उतइत्याहएक-
त्र एकस्मिन्प्रदेशे अस्यपर्वतस्यकाव्यस्यवा चेद्भान

ए·चं·
पांकी
११

॥

पवित्रस्य चंद्रस्यामृतकिरणस्यातपेन मयूखेन स्वे
दरस्य पदे चंद्रस्य सोमवंशोद्भूतस्य राज्ञ आयेन प्रता
येन संदरस्य अपरस्मिन्पार्श्वे प्रसृतरङ्गसभासः स्फार
दादित्यस्य पदे स्फारितसूर्यवंशादिप्रसूतस्य नतद्भूत
स्य राज्ञ इति वा स्फारतन उग्रभाः सूर्यो यत्रेति ॥ ७३ ॥
मनोज्ञरामायणभारताख्यभागीरथीसागरसन्निपा
ते संतः प्रकामं विदध्यवगाहलीलामस्मिन्नवरङ्गदिनिका
व्यतीर्थे ॥ ७४ ॥ अस्मिन्काव्याख्ये तीर्थे सहृदयाः संतः स
ज्ञानाः अवगाहलीलामध्यापनादिसज्जनक्रीडां कुर्वते
विधृते अवगाहस्य कलुषस्य स्फुटदिनि इति नाहूति वाचके
अवगाहने पुनः ख इति नेचन पुंसकामिति मेदिनीकरः
रथीसागरस्य सन्निपातो मिलनं यत्र तस्मिन्निति पाप
नाशकत्वेन गंगासागरसंगमाख्यानमिति तीर्थे यात्र
त्राभूत्तेन पापनीरजस्कं च अवतारयितॄणां वृ
पात्रोपाख्यानं विधिचिति मेदिनीकरः ॥ ७५ ॥ विला
दिना गाविशूरीवनानां तां मल्लशीतेन्दुकेदिनत्त शोभा
सहृदिक कविः सूक्तिमयी वितन्वन्प्रजापतेः किं न समा
मल्लः ॥ ७५ ॥ विलासिनेनि शोभनात्रनिशायिना उक्ति
ने अयं कविः सूक्तिमयीं सर्गं वितन्वन् विलासय
समानमल्लः किं न अपि तत्तुल्यमल्ल एव उभयं वि
सिनाश्रि विलासिनेत्यादि अतः पवनः आद्यः सम
शः पुरीनगरीवनानां तावनेयत्रेति समप्रकारापर्व
नादि सृष्टिः सर्वपदार्थस्याविस्मयस्य कार्यत्यादि च
ग्रन्थे तैषां वर्णनानां मल्लशीतेति मल्लशीता प्रका
शिता वनिताचारे दोषश्च स्मानतुदशस्य वा अर्कस्य
दिमस्य नदृशस्य वादिनस्य वा मरत्तणां वा शोभाय

व प्रजापतिनोत्पादितेन चेंद्रादयः प्रकाशिताः क
विनावर्णनेनेति श्लेषः ॥ ४५ ॥ दोषांधकारव्य
पसारणेन गुणांबुजोन्मीलननित्यदक्षाः संतः प्र
बंधं मम शोधयंतु लोकं मयूखा इव चंडरश्मेः
४६ ॥ दोषेति संतः साधवो मम प्रबंधं मत्कृतं काव्यं
शोधयंतु शुद्धं कुर्वंतु चंडरश्मेरादित्यस्य मयू
खा इव चंडरश्मेः किरणा लोकमिव शुद्धं प्रकाशि
तं कुर्वंतीत्यर्थः कुत इत्याह दोषेति दोषांधकारव्य
पस दोषस्य पापस्यापसारणेन दूरीकरणेन
पक्षे दोषा रात्रयः तासामंधकारस्यापसारणेन दो
षः स्याद्दूषणे पापे दोषा रात्रौ भुजेति चेति मेदिनी
कारः दोषस्य पापस्यान्धकारस्य तमसश्चेति वा
श्रादित्यद्वये कर्मविधानात्तत्रादिना पापापनोद
नवर्णादिति गुणेति अंबुजानां कल्याणानां पद्मसदृशा
नां गुणानामुन्मीलने प्रकाशने दक्षाः कुशला इ
ति हेतुगर्भविशेषणम् सूर्यकिरणा अपि पद्मं
प्रकाशयंति सज्जनाश्च गुणान्प्रकाशयंति ॥
४६ ॥ अनध्यन्याः काव्येष्वलसगतयः प्रागल्भ्यगह
नेष्वज्ञाः खिन्नावाचां परिणतिषु मूकाः परगुणे वि
दग्धानां गोष्ठीषु कृतपरिचयाश्चाखिलाय भवंत्य
स्ते किं कविभणितिकाद्रुतिनिकषाः ॥ ४७ ॥
ते तादृशा जनाः कविभणितिषु काव्येषु काद्रुति
निकषाः काव्यपरीक्षकाः किं भवंति अपितु न भवं
ति हिरण्यस्यापि परीक्षा कषाभावेन भवतीति भा
वः ते कुत इत्याह अधानमलेगस्फूर्तीति अधन्याः
अस्मगले गामित्यधिकृत्य अधुनाद्येन वाधिविति प
नघभाव कर्मणा विति प्रतिवद्धाः तेनानन्यमा
सः अनध्यन्या इति काव्यमार्गास्तादृत्यर्थः अल

सङ्गतमिति प्रागल्भ्यमिवाहतं प्रागल्भ्यगाहतं तेन चाल
सङ्गतेष्वः अप्रतिभत्वादतनभिज्ञा इत्यर्थः अत एव
ता इति वा चापरिणतिश्च परिपाकेच्छ अत एव विज्ञाः
काव्यादिकरणे चिन्तादिना यत्नः एव ज्ञायते तेन तदभि
ज्ञाः मूका इति परगुणे अन्यस्य गुणकीर्तने मूकाः
असमर्थाः ख्यातिविज्ञानां गुणख्यापणे विमुखा
उदासीना इति यावत् मूका इति पाठान्तरं तत्र प
रगुणे अप्रगुणे मूकाः अज्ञाः विदग्धानां विशिष्टा
नां कवीनां गोष्ठीषु समाजेषु न ख्यातापरिचयोउप
जीवनं येस्तेन तथा ॥ ५२ ॥ असद्भिरारोपितमहा
घ्रणापि न स्तुतिभिरार्यैरवधीर्यते मे पीतोज्झितानाम
मृतविन्दवो नाकिं सुधानां नाकजुषो जुषन्ते ५३ ॥
असद्भिरसज्जनैः दुर्जनैरारोपितमहाघ्रणापि ममस्तु
तिः काव्यं आर्यैः सज्जनैः नावधीर्यते नावधीरणी
यानोपेक्षणीया अन्यावधीरणात्तु सद्भिस्तु ना
वधीर्यते अत्र निदर्शनमाह पीत्वेति राज्ञनाम्न एव
न चापीत्वा उज्झितानां त्यक्तानां चोऽशीचेदसंबंधिनी
सुधां पीयूषं नाकजुषो देवाः किं न जुषन्ते किं न
सेवन्ते किं नोपभुञ्जते इति यावत् अपि तु जुषन्त ए
व तेनातिशुद्धत्वाद्रसज्ञत्वं तल्पतास्य ग्रन्थस्य महा
एव न इति ॥ ५४ ॥ रत्नावलीतल्पतास्यग्रन्थस्य महा
लस्य श्रीमद्दिग्विजयस्य रत्नावतंसस्य भावतसमण्ड
समन्त्रविहिताभिरतिवैभवपादवघ्यः स्फटवीरलक्ष्मीः राज्ञा
जितसर्वलोकः ॥ ५५ ॥ इवपादुर्यस्याभिरामिवं
दर्पीयन्नाह रत्नावलेसमरिति इदानीं काव्यस्वरूप
नाम राजा बभूव अभूत किंविशिष्टो भावतसमण्डल
स्य भावतलावण्यस्य रत्नावतंसः रत्नखचितकर्णाल
ङ्कारः किंविशिष्टः भावतमण्डलस्य संपद्भूतत्वे उल्ल
कारः शिरोलङ्कारो वा प्रेमणं माणिक्यसहोदरकाणा

पूर्वं वर्षो स्वेदे इति जंबुद्वीपादेर्महागिरिभिरवच्छि
न्नानि देशभागानि वर्षमुच्यते तत्रायं लोको भा
रतं वर्षमिति तथा चागमः उत्तरं यत्समुद्रस्य हि
माद्रेश्चैव दक्षिणम् वर्षं तद्भारतं नाम भारती य
त्र संततिरिति पुनः किं कुर्वन् क्रामन् प्रभुशक्त्या
दिग्गविषयितान्नृपान् स्वायत्तान् कुर्वन् स्फुटेति स्फु
ट प्रकाशिता वीरलक्ष्मीः वीरसंपद् यस्य जिता प्रो
द्यदिप्रत्याहितेति ह्रमंत्रेति ह्रमंत्रो सम्मतारयः मंत्रो
त्तवविहिता अभिरतिः प्रीतिर्येन सः पाण्डुपक्षे
ह्रमंत्रविहिताभिरतिरिति ह्रमंत्रेण ह्रहन्महिमया
दैन मंत्रेण दुर्वासोदत्तेन विहिता अभिरतिः ह्ररतप्र
शांत्यर्थं येन सपापुत्राद्येन स्वयं नष्ट्रा उत्पादि
ता इत्यागमः तथा यशोभिः कीर्तिभिः पाण्डुरवर्
ण्णैः अभिसर्वतोभावेन रंजितः अत्र रक्तो ह्रातः स
र्वलोको येन स तथा पाण्डुः जैनोपनीतो सितैरिति
विग्रहः एवं रेविसर्जनीयस्य लोपो वक्तव्यः इति
दृष्टायं स्फुटेत्यत्र विसर्जनीयलोपः भारतपक्षे सो
मवंशो पाण्डुः नाम राजा बभूव भरतो नाम सोमवंशो
द्भवस्तस्यापत्यं भारतस्तस्य राजमण्डलस्यान्ति वह
स्य वन्नावितस्य दर्पभाजनकत्वात् रामात्रजेषा
त्रिमे देहो स्थितेते भरतो नटे इति विग्रहः दृष्टादिषोय
पोभिः वपुः क्रामन् रथेन हेतुभूतेन स्फुटा वी
रलक्ष्मीर्यस्य यद्वा रथोस्यास्तीति रथी रथवान् म
त्वर्थीयः ह्रमंत्रेति पोभनार्थे मंत्रा सत्ते विहिता अ
भिरतिः प्रीतिर्येन स तथा पोभनो मंत्रो यस्य तस्मि
न्न मात्योभिरतिर्यस्येति वा लोकानुरंजनादंजितसर्व
लोको यशोभिर्वा ४७ ॥ मातः श्रियेमन्दधारिन्द
मन्याः स्नाच्याः पारत्कालरूपोऽपि स्रोः असो प्रजा

रघु.
पावी.
१३
13

पालनदक्षभावाद्राजस्य चक्रे मनसः प्रमोदम्
८७ ॥ मात्रीति असौ रूपाद्यथः अजस्यमना
न्वः स्वपितुः मनसः प्रमोदं हर्षं चक्रे अक्षान रवौ
रज्जः अजाहृष्याराद्य इति पुराणम् अत्र हेतुमाह
प्रजेति प्रजानां पालने दक्षभावः कुशलत्वेनस्मा
तु इन्दुमती भोजभगिनी साम्यमानेति तस्मा
दिङ्मत्याः श्रियं शोभां मन्मथं धारयन् तस्यामातुः
नगुणातिरेकारोपणादिति भावः स्वगुणाजमसह
यद्वेन्दुमत्या स्वच्छकान्त्या उडुपतेः शरत्काल इवेति
श्रियं शरत्कालः सन्दधाति नहिदिति न तत्र अगुणाः
वाविषयः अर्थालोकानामिति पक्षे असौ पाण्डु
त्यपः अजस्य ब्रह्मणो मनसः प्रमोदं चक्रे ज्ञानदृ
त्याह प्रजानामिति तत्र पक्षे प्रजानां रक्षणे दक्ष
भावात् कुशलत्वात् पक्षे प्रजापालनेन दक्षभा
वाहत्व प्रजापतिसमभावाहत्वादृयोहि प्रजापाल
का अतोऽस्यापि तत्पालत्वाहत्वात्वे फलमेव मात्र
नेनत्या अविकायाहेतोरिन्दुमत्याः स्वैदयकान्त्या
उडुपतेः श्रियं शोभां मन्मथं धारयन् मातुः स्वैरे
नेभ्यो जातरत्नारामः तस्मात् नाकाशिराज इति
अविकानाममात्रवल्लयाभस्मनागच्छुरणे हता
व्यासमिष्पनवतीति पुराणे अजस्य श्रीमहा
निव्याख्यानेन तदाक्रमावतारोनासीदिति पुरा
नाविरुद्धम् नतत्र प्रहतेमतेनारकाप्युइवोसिद्धय
मित्यमरः ॥ ८८ ॥ विविधवीर्यस्मादिवेगतस्य
पितुः मरान्त्यप्रतिपद्यमाने अरीपयोध्यां धूनरा
सुभद्रांमहान्तिशोभांस्त्रावमधुवाम ॥ ८९ ॥
मरपारथः अयोध्यां अरीमधुवाम अविवसति
न्मविकाशि इमहान्तिशोभांयात्रामलइतिह

लिप्सोर्भार्यकन्याभिरित्यर्थः तथा धृतराष्ट्रस्य भद्रंक
त्यागं यथास्या तथापि तज्जेन कस्य राज्यं बाल्ये प्र॰
तिपद्य दिवंगतस्येति धर्मविधिना स्वर्गं प्राप्तस्य॰
किंभूतस्य विचित्रं नानाप्रकारमाश्चर्यहेतुकं वा॰
वीर्यं पराक्रमो यस्येति वीर्यं शुक्रे प्रभावे च तेजः
सामर्थ्ययोरपि इति विश्वः पश्चात् पाण्डुः हस्तिपो
माण्डी हस्तिनापुरमध्युवास श्रेयोऽभ्यामिति न॰
ह्याने योध्यायो धनीयो यस्मात् धृतराष्ट्रः पाण्डु॰
ज्येष्ठभ्राता तेन भद्रं प्राप्तो भीतो भद्रः शिवे खञ्जरीटे
वृषकेतु कदंबके करिजातिविशेषे च क्लीबे मंग
लमल्लयोरिति विश्वः विचित्रवीर्यो नाम शान्तनुपु॰
त्रस्य राज्यं बाल्ये प्रतिपद्य बाल्ये दिवंगतस्येति ।
विचित्रवीर्यस्तु नपत्य एव मृत इति पुराणं बाणास्त्र॰
णां करालकार्मुकभृता तेन स्त्रनाविद्विषः स्त्राभार॰
णयज्जृम्भितो रणपतिप्रारब्धनानाशिक्षा सर्वोर्वीप
तिकल्पिताभयचतुर्दिक्पालवर्जितेति ता मात्रा॰
स्थापयता त्रिलोकचलये दोर्मण्डलेमण्डितम् ॥
बाणास्त्रोऽलीति तेन राज्ञा दृष्टार्थेन पाण्डुना दोर्म
ण्डले बाहुप्रकाण्डे मण्डिते भूषिते दोर्दण्डात्तु
नाभ्यज्ञ इत्यमरः किंविशिष्टेन स्यादि बाणाना॰
मार्गाणां श्रेणिपंक्त्या करालदेहे यत्का मेकांध
नुल्लद्धिभति धारयति बाणश्रेणिकरालकार्मु॰
कभृता तेन करालं दन्तुरे प्रोक्तं भीषणे चाभिधेयव॰
दिति विश्वः विद्विषो रिपून् घ्नता मारयता कार्मु
कधारणं शत्रुमारणहेतुरिति अत एव शत्रुनाशात्
स्मा भारतेयेन हृष्टीभावापगमनेन जातेन सोत्क्षा॰
ज्जृम्भितो यो रणपतिः शोभतेन प्रारब्धा नानाविधा
शिक्षा यस्य सता हर्षेण ज्जृम्भितेकारणे स्त्रीणामी

रघु॰
पाठी
१४

15

हास्फुरितयोरपीतिमेदिनीकारः त्रिलोकवल-
येत्रिभुवनेऽपि निजामाज्ञां स्थापयता पूर्वैः प्राची-
नैरत्तेऽभयंवेषु पृथ्वीपतिभिः भूपालैः कल्पितेऽद-
त्तमभयं यत्रैवंविधचतुर्दिक्पालान्वर्जयित्वेति
क्रियाविशेषणम् पूर्वैः पृथ्वीपतिभिः कल्पितमभ-
यं येऽपुते वैतेचतुर्दिगीशास्तेति विशेषणसमासो-
वा पूर्वैर्नरपतिरविनाचाराज्ञतोपादने नापितदा-
त्राहातेतिभावः यद्वा त्रिलोकवलयेदोर्मण्डले-
मालिकतमिति योजना भुजमण्डलमपिवलयैरल-
क्रियतेतिसाम्यम् ॥ ५ ॥ विहितमस्य प्रतिनृपकु-
लेराजशब्दमस्मिलोके तेनात्मानेनियतविषयंकृत्वे-
नातेजसञ्च पादन्यासः शिरसिरक्षितः सर्वपृथ्वी-
धराणां छत्रच्छायामपगमयताचर्मभासाचतुल्यं
५ ॥ विविक्ष्येति तेनदर्पारूढेन पादेनावासवे-
षांपृथ्वीधराणांराज्ञांपर्वतानांवाशिरस्सूत्तमांगेषु
लोपवितः चरणानांरश्मीणांवान्यासश्चारोप-
तथादिनापर्वतेमाचरितं तेजोर्पणंवादित्य-
मपिराज्ञोपर्वतेष्वपिचरणार्पणं -- तद्वतिना-
तुल्यमहर्षांतद्वादिति पादन्यासःचर्मभासा-
दन्यासःक्रियतेदिति तत्सहर्षोनेति यथातेनृपा
यद्वातेनपर्वतादौ तथातेनापीतितात्पर्यं
पकंतुल्यमेकमेवेनचर्मभासाचेति व्यस्तद्
राज्ञाचर्मभासासहैवेतिव्याख्याने यद्वातेनोभयेन-
शिवाविरोधिमन्येतः तुल्यमेकदेवपर्वतानां
व्याचितः राज्ञांशिरस्सूत्तमांगेपादन्यासो-
पिमस्तकयोःपादन्यासः चरणार्पणंचकृतमिति पादेर-
याक्षपरासनेनेवरापस्कविरामे छत्रच्छायेति छत्रच्छा-
प्रायेणछत्राणांस्थि-

दनात् संग्रामेष्वप्रतिहतत्वात् किंभूतेनोभयेन
प्रतिरूपकुले सर्वेषां रूपाणां कुले विलसितस्य
विषये तस्य राजशाहस्य तेजसा स्वनियते विषये
मात्रं स्वमात्मानं कुर्वता स्वनिष्ठं राजशाहे
राजशाहे तेजस्त्वं कुर्वतेत्यर्थः तेजो दीप्तिप्रभावे च
स्यात्पराक्रमे रेतसि चेति विश्वः शिरः प्रधाने सेना
ग्रशिखरे च स्तेऽपि चेति पूर्वं सकलराजकुले रा
जशाहस्य तेन सह साधारणाभूत् तस्य स्वाधीनस्य
स्य तेजांसि साधारणान्यासन् तेनोभयेन सकल
राजकुलविषयाद्राजशाहस्तेजोभरस्त्वविषयः
स्वमात्रनिष्ठः कृत इत्यर्थः राजशाहस्त्वं ग्रहराज
त्वे तेजसो दीप्तेः स्वनियतविषयमात्मानं स्वकुर्वे
नाचर्मभासा चेति संबध्यते राजशाहस्स्वद्रष्या
सीत् चेद्वाटतितेजस्वित्वात्सूर्य एवेति ॥ ५१
करग्रहात्कोसलकैकयेन्द्रभवाग्रहश्रीर्विनम
स्रमित्रः पृथ्वावरोधस्समरे जितारिर्गोमाहिमा
द्रीश्वरतां स लेभे ॥ ५२ ॥ करग्रहादिति स
दशरथो हिमाद्रीश्वरतां लेभे प्राप हिमाद्रिर्हि
सर्वान्पर्वतान् तद्वत्स्वरीशो बभूवेति भावः गो
मा [illegible] कर इत्यर्थः गृहश्रीरधिकालक्ष्मीः
कः श्रीधिकप्रोभोगा कृत इत्याह करग्रहादि
ति कोसलेन्द्रः कोसलाधिपतिः कैकयेन्द्रः
कैकयाधिपतिपतिः राजविशेषः तोऽउभौ पूः
उत्पत्तिः स्थानं ययोः कौसल्याः कैकेय्यास्तद्दु
त्रहित्याः करग्रहात्पाणिग्रहणादित्यर्थः वि
नम्रहितेति विनमन्ती प्रणमन्ती सामित्राद्दीवा
पत्नी यस्य तथा पृथ्वी मस्तेति समरे त्ररोधः पत्रुक
तृकापरोधरहितः न विद्यते रोधो यस्य तथा को

राघु.
पाठी.
१५

15

रवेर्धीमले रश्मी पाण्डो प्रत्ययदाण्ड्योरिति विग्रहः
जितात्र्ययः श्वाश्वोयेन सतस्था भूः स्थान मात्रेक॰
स्थिताधराण्या मपि योषितीति मेदिनीकारः भारत
पक्षे स पाण्डुः माद्री मृतो माद्रीपतित्वं लेभे माद्री
मद्राधिपसुतान कुलसहदेवमाता अत्र हि पाण्डुः
पाण्डुवर्णो कोमलकैकयेन्द्रयोः द्वयोराज्ञोः भुवोः
भूम्याः करग्रहात् राज्याग्रभागग्रहणात् तथा स्त्री
रधिकसंपत्तिः विनमेति शोभनानि मित्राणि॰
यस्य तथा मित्रसंहरतिवी पृथा कुंती अवबोधः
पत्नीयस्य स पृथाववोधः अवरुध्यन्ते इत्यवरोधा
दाराः अवरोधो राजदारेष्वन्तःपुरे इति विग्रहः अ॰
न्यत्समानम् ५२ ॥ ततः प्रजानां परिपालनेन॰
कृतात्मकृत्यः क्षितिपः कदाचित् प्रियानुयातो
मृगयानुरोधात्सयौवनश्रीः प्रययौ वनांतम् ॥
५३ ॥ ततइति क्षितिं पातीति क्षितिपः राजारथ
रथः कदाचिद्वनांते वने प्रययौ गतवान् कुतः
स्याह मृगयानुरोधार्थं आखेटकरभसात् किं॰
विशिष्टः सह यौवनश्रिया वर्ततेयः सयौवनश्री
स्तत्कृत्यः कृतमात्मनः सर्वतो रक्षणेन कृता॰
पालने राजधर्म इति स्मृतेः प्रियैरिष्टैः सह द्विर॰
थान्यैर्निकैः रञ्जयानः कृताः नुगमनः कदाचित्प
रितिनिष्ठित कालो पलक्षणार्थं पक्षे स क्षितिपः पा
ण्डुः वनांते कानने प्रयो प्रियानुयात इति प्रियाभ्यां
कुंती माद्री भ्यां कोना भ्यामनुयातः कृतानुगमनः
सयौवनश्रीर्येनइति अतः स किल पाण्डुः पत्नी॰
भ्यां सह एव जगामेति अन्यत्समानम् ॥ ५३ ॥
श्यावानुयातह हरिणी रमितो लपानां कोलावली

दलितबालकशेफकानाम् दंतावलोन्मथितप
ल्लवमल्लकीनो राजाभवद्वनभुवामुपकण्ठवर्ती
॥ ५४ ॥ सावेति मदं शार्दूलः पाण्डुदीवनभुवामुपक
ण्ठवर्ती समीपस्थो बभूव काननभूमिसमीपमाग
तवानित्यर्थः कण्ठोगले सन्निधाने ध्वनौ मदनपाद
पे इति मेदिनीकारः तासां किं विशिष्टानां पाण्डेति पूगा
वेनशिष्टानां त्यान्यार्थे हृतानां गमनायाहारिणीनया
लसितत्रास्त्रानितउलपरत्नाणि विशेषो यत्र तासां
तालच्छादिरयं शावपाहूः कोलेति कोलानां सू
कराणां सावलीभिः पंक्तिभिर्दलितानि खण्डितानि
नि बालानि कशेरुकानि यासां तथा दंतावलेन ह
स्तिना उन्मथितपल्लवा खण्डितपत्रा मल्लकी लता
विशेषो यासां मल्लकी पत्रे स्त्रियामिति विश्वः श्रुं
गात्तगमन ॥ ५५ ॥ पांशुव्याकीर्णरेणुकुत्तान
शिनश्वरद्वसरीव्यंनरद्व न्यचोपरद्वकाण्टी
रवरवचकितव्यस्तमातंगयूथं खङ्गस्व्यालने
खङ्गस्तमूलकालकालप्रोतहृजगच्छंगंतभल्लध
त्वाच्छुभल्लंवनभुविहगयाकर्मतेन प्रनेने ५५
पांशुकीते तेनतुभयेन राज्ञा वनभुवि वनस्थाने मृग
याकर्म श्राखेटकव्यापारः कृतः पांशुना रेणुना
त्वविशेषेण व्याकीर्णविदिसोरेणुः मृगाविशे
षायत्र तन्नथा पांशुः सव्याविन्ने दोषाभित्वालघे
कोलकेपि चेति विश्वः विशेषेण कीर्णे इति कृवि
क्षेप इति धातवनुसारात् कुत्तेति कुत्तेनोल्लिम्रेनान
शितेन नीहोनप्रापेण त्वसरः विशिष्टताः अतएव
रीव्यन् भ्रमन् तरद्वर्यंत्र प्रनेतंवलिक्षितपारेण
वसारेतिवा तरद्वक्षत्सवृगादनरक्ष्यमरः न्या
त्तोपेन न्यापाहेन द्वन्द्वः तोभधारकोवायः काण्टी

राज॰
पार्वती॰
ए

16

रवः सिंहस्तस्य रवेण चकितं भीतं व्यस्तमितस्ततो
गतं मातंगयूथं हस्तिसमूहो यत्र द्वोभनेत्वच
संपदादित्वात्क्विबन्तः त्वचं दधाति धारयतीति
त्वच्चः त्वच्चेत्यादिनिपातनसूत्रेण मन्यानदण्ड
तिरस्कृतो लोभितइति स्यात् सिंहः कण्ठीरवः पैलः
पारीन्द्रः केसरी हरिरिति शब्दार्णवः खड्गेण कृपाणे
न लूनः छिन्नः खड्गेण गण्डको यत्र तुमुलेन कल
लेन ध्वनिना सेनाहृतकोलाहलेन प्रान्ते एकदेशाकु
जेतः शाल्यायमानाः शङ्किताः पलिता यत्र भल्लेना
स्त्रविशेषेण ध्वस्तः अच्छभल्लो भल्लूको यत्र अच्छ
भल्लस्तु भल्लूको नाम मालाविभीतकइतिविश्वः
५७ ॥ एवं सतेनाग्रटनेव वने प्रतिबध्यमानो मृगया
विहारः समीरणोत्सेकइवाप्लुनावं समांगविंता
न्तपतेर्जहार ॥ ५८ ॥ एवमिति स मृगयाविहारः
आखेटकरूपा क्रीडा न्टपतेर्देशस्य स्वपालको वा
समांगचिंतो स्वाम्यमात्यसुहृत्कोशराष्ट्रदुर्गब
लानि संधानेन जहार त्यक्तवान् अन्तटने प्रत्यहेनेनो
इति राज्यचिंतां विस्मृतवानित्यर्थः समीरणोत्से
कोनावमिव यथा वायोरुत्सेकः उद्रेकः अप्लुजा
कुप्रकारेणनिबध्यमानं दृश्यते नयति एवं सर्वो
मृगाछबुदितसमसोपनेन सम्बध्यते ५९
भीकम सत्वाहृगमापकाराद्विवर्तमानेगतभीरु
श्रुविंचकार ॥ ५५ ॥ मालत्वभूतमनुअग्रजन्मान
न्मानेमृदुवैरविंमार्गणा महतिदर्पार्थः अनुअजा
रक्षितवान् मृगाणां कलत्वप्रभूतं वेषपंचका
गायः पशावेद्युयाविरस्तीति सत्वावगतस्पृहा
इति अग्रेप्रथमतः तद्वियाय्य

येत्या जन्मन्हाहिर्यस्य सोग्रजन्मा ब्राह्मणः ततो
न्ज्समासः अनग्रजन्मानमिति द्विजात्मजेत्या
अनग्रत्वाहितिति तमस्रानदीविशेषः तस्या उपकण्ठे
समीपे तमसोपकण्ठे विवर्तमानेविशेषेण वर्ति
ते सविविशिष्टः गाढान्बुद्धिर्यस्य सतथा गाढबो
ढ्हलानिचेत्यमरः तथागतामीभेर्ययस्य सतेः
किंविशिष्टं अभीकंभयशून्यमिति भारतपदे
मपाण्डुः अनग्रजन्मानं ब्राह्मणं मृगरूपधरं अभी
कंकामुकंमैथुनासक्तमृषिवाणालस्यभूतेवकार
नअग्रजन्माज्योतिष्टायस्मात्सअग्रजन्मावर्णज्येष्ठा
मृगपक्षायमृगरूपधरइति मज्ञानतमसामोहेनगाढा
अवगाढाविलोलाबुद्धिर्यस्यसतथा उपकण्ठे अत्यन्तसमी
पेस्थितमृषिमिति गाढेति गाह्यविलोडनेइतिधात्वनुसा
रात् अभिकः कामकेक्रूरे निर्भयेत्रिषुइतिमेदिनीकरः
केनाविज्ञापेनमृगरूपस्यकस्यचिन्मुनेर्मिथुनासक्तस्य
मृहारः हृतः पाण्डुनेतिपुराणे ५९ ॥ तपस्विनश्छिन्नतनो
ःशरेण विभिन्नमूर्तेर्जनकान्महार्तेः शापं हतापाययनिव
द्धमस्तेप्रियात्मजन्मोजशालोप्यवाप ६० ॥ तपस्विनइति
सदशरथः शापमवापप्राप्तवान् मुनेराक्रोशाविषयोभूदि
त्यर्थः कुतइत्याह जनकात्पितुः कस्यतपस्विनः स्नद्य
नेः तपस्विनइतिषष्ठ्येकवचनं किंभूतस्यविभिन्नेति वि
शेषेणभिन्नाविदारितातंगता ...... द्विनाम्हूर्तिः शरीरंय
स्यसतथा किंभूतस्यशरेणदशरथप्रेरितेनछिन्नतनोर्व्या
प्तदेहस्यकेचिन्नुशरेणविभिन्नमूर्तिरित्यपिपठन्ति तत्र
छिन्नतनोरितिभिन्नपदं अर्थान्तरमूर्तिः शरीरं शापस्व
रूपमाह सतेति हतस्यापायेनाविश्लेषेणानियतोम्स्त
योव्रतानवियोगेनत्वमपिमृत्युमवाप्स्यसीत्यर्थः किंभू
तान्महार्तेः महानाधिः मानसीव्यथायस्यसतनाहशापान्

ग॰
प॰
१७
17

प्रियस्यमरणेऽस्मात्तदृष्टौऊर्ध्वलोऽपिसावधानोऽपि अतःप्र
मादादेवसत्भूदितिसंचिंते भावतयद्दे सपोद्धस्तपस्विनः
सकाशात् शापमवाप किंभूतात् छिन्नतनोऽस्मगरूपेण
गमनजयदेहात् कस्मैस्नातापाय सुष्टुतापाय यस्नात्रा
पाय तपस्विनः पुनरपिकिंभूतात् शरेणविदारिततनोः
शापं कथंविधं प्रियायाउद्दृष्टौनिबद्धमस्तंप्रियायाःकांता
या अतद्दृष्टौसंभोगकालेनिबद्धोनियतोमस्तुयेनताद्द
शं तथातपस्विनः कीदृशात् जनकात् उत्पादकात्
महाधेःबहुमनःपीडायाःतथाऊशालोप्यवहितोपिदश
दृष्टादेवमवाप ८० ॥ विषद्रुमस्यव्यसनाद्यस्यफलंसल
श्चास्तहसानिवृत्तः कांतोपभोगेष्वपराङ्मुखोमानिनायर
कालेनिवपत्यदुःखी ८१ ॥ विषेति सदशरथःकालेसम
यंनिनायनियतिस्मा अतिवाहयामासेत्यर्थः निरपत्यास
न्दुःखोदुःखवान् अपत्यशून्यत्वात् पुनःकिंभूतःकांतः
कमनीयउपभोगोविषयाद्यायोभोगस्तत्रपराङ्मुखोनि
स्पृहश्चात्मायस्यसतथा यद्वाकांताया उपभोगेष्वविला
सेष्वपराङ्मुखआत्मायस्यसतथास्त्रावनिस्पृहइत्यर्थः
सहसानिवृत्तः हठात्परावृत्तः अर्थाद्दोषादिति किंभू
त्वाव्यसनात्मकस्यविषद्रुमस्यमृगयारूपस्यविषवृक्ष
स्यमहाधिजनकशापरूपफलंप्राप्येति यद्वाशापभयादे
वकांतोपभोगेष्वप्रियाया उपभोगेष्वविलासवःपाण्डुरिति
शेषसमानं ८२ ॥ अप्रसन्नतेःसतिकृतःस्त्रावोनीत्यसौवि
चिंत्यप्रतिपन्नमन्युः समस्तदारैर्नियतःस्त्रियनार्थेराज्ञा
स्वरप्रार्थननतत्परोऽभूत् ८३ ॥ अप्रसन्नेनेति सराजादशरथ
युःपांडुवा स्वदारैःसपत्नीभिःसह स्नानार्थे स्नानाद्देवा
तोप्रार्थननतत्परोऽभूत् नियतःकृतनियमः पुत्रार्थेदेवान्
हिरण्यवनेचकारेत्यर्थः किंकृत्वाइतिपरामस्यकिंनाद
प्याह अप्रसन्नेनेरपत्यस्यइहलोकेपरलोकेचनाकिंसाव

मिति तथाचस्मृतिः पुत्रेणलोकांजयतिपौत्रेणानंत्यम
श्नुते अथपुत्रस्यपौत्रेणब्रध्नस्याप्नोति विष्टपमिति स०
किंभूतः प्रतिपन्नमन्युः प्रतिपन्नः प्राप्तोमन्युः शोकोयेन
सतथा मन्युशोकौतुक्रुधावित्यमरः यद्वाप्रतिप
न्नः अंगीकृतोमन्युः क्रोधोयेनसतथाशापकर्तृकस्तु
नेरित्यर्थः एतस्मिन्निपतेनोभयेनराज्ञाप्रजार्थदैवता०
प्रार्थनाकृता १२॥ एतस्मिन्नतिसमयेविपत्सुभीताः
क्षीराब्धेस्तटभुवमेत्यशक्रमुख्याः गीर्वाणाःकृतनत०
यस्त्रिधाम्नेलोकानामुदितमुपप्लवंशशंसुः १३॥
एतस्मिन्निति एतस्मिन्काले शक्रमुख्याःगीर्वाणाः इं
द्रादयोदेवालोकानामुदितंजातमुपप्लवमुद्वेगंशशं०
सुः कथयामासुः क्षीराब्धेः क्षीरसमुद्रस्यतटभुवमेत्या
गत्यविपद्भ्योदानवेभ्योभीताः कस्मैशशंसुः त्रिधाम्ने
त्रीणिधामानिगृहाणिस्वर्गमर्त्यलोकपातालरूपाणि
तस्मैविष्णवेकृतनतिस्त्रकयइतिकृतानतयोनमस्का
राः स्तवाद्यैःस्तवाद्यैःकृतनमस्काराःकृतस्तोत्राःस्वेत्या
भयत्रस्तमाने १३॥ सान्द्रप्रमदंत्रिदशजनंयथानुरूपंते०
जोंशैर्भुविजननाययत्रतत्र दैत्यारिरुदितस्तमोनुदोन्व
वायेस्वैरंशैरवतरितैश्चतुर्भिरस्मत् १४॥ सान्द्रप्रमदेति
तदनंतरंदैत्यारिः श्रीविष्णुः तमोनुदः सूर्यस्यान्ववायेवं
शे स्वैश्चतुर्भिर्विभागैरामादिरूपैरवतरितेभ्यस्मत् इक्ष्वा
निस्म दशरथगृहे विष्णुनावतारःकृतः किंकृत्वेत्याह
त्रिदशानांदेवानांसमूहमिति सांद्रप्रमदमाहृष्यकिमि
त्याह यथानुरूपमिति यथायोग्यंनिजैस्तेजोंशैस्तेजो
भागैर्यत्रतत्र भुविजननाय जननार्थमिति यथायोग्य
रूपेणाभवद्भिरपिपृथिव्यामवतारः क्रियतामिति रामा
यणेरुद्रावतारोहनूमान् सूर्यावतारःसुग्रीवः भारतप

रा० पा० १८
18

दे तमोनुदश्चंद्रस्यवंशे चतुर्भिरंशैरिति तद्धार्थेत्वत्तो
या तैस्सहदेत्यादि: अवतरितुमैच्छदिति धर्मवायवेन्द्र
अश्विरूपैरिति चतुर्भिः विस्ववतारः श्रीहलसः अभिमन्यु
चंद्रावतारः चेन्द्राग्न्यर्कास्तमोनुद इत्यमरः १४ ॥ ततो
मुनिव्याहृतमंत्रयुक्त्यानदीयपत्नीपरिचर्याय भोक्त्य
पसत्याचतुष्पस्मजस्मेपिंडोपलब्धिर्विबुधप्रसादात् १५
ततइति तदनंतरंतपस्यदशरथस्यविबुधप्रसादात् दे
वताप्रसादात्पिंडोपलब्धिः जातेजाता पुत्रलाभोजातइ
त्यर्थः देहमात्रेनिवासेचदेहागारैकदेशयोः पिंडः पु
मान्बलेसान्द्रेक्लीबमाजीवनायसोरितिविश्वः देहप्रदे
शः पुत्रपवोपलब्धितः अंगादंगात्संभवसि इति श्रुतेः
कथमित्याह मुनीत्यादि मुनिनाऋष्यशृंगेणव्याहृता
यामंत्रयुक्तिः क्रियेतितत्पत्नीनां कौसल्यादीनांपरिच
र्यायदेवानांभक्त्याउपसत्याउपासनाप्रकारेणेति ऋष्य
शृंगेनदशरथः पुत्रेष्टिंकारितः पक्षे त्वपस्यपांडोः मुनि
नादुर्वाससाव्याहृतामंत्रयुक्तिः कुंत्यैतेनमंत्रोदत्तः तथा
न्या विबुधानांधर्मपवनेन्द्राश्विनानांप्रसादात् कुंत्याकि
लधर्मेणाधर्मादयोयेआहूतास्तेभ्यः युधिष्ठिराद
योजाताः माद्र्याचाश्विनौकुमारावाहूतावितिताभ्यांन
कुलसहदेवौदेवज्ञौजाताविति पुराणस्मृतिः मंत्रोवेद
विशेषेस्याद्देवतानांचसाधने गुह्यवादेपिचपुमानितिमे
दिनीकरः १५ ॥ स्फुरदृष्यशृंगविततान्यथान्वहेसव
नानराण्यधिगतोमहीपतिः चतुरोपिपंचसगावभास्कर
श्रियास्तनयानवापहरिदश्वतेजसः ॥ १६ ॥ स्फुरदिर
निश्चयानंतर्यैमहीपतिः दशरथः चतुरः चतुः सांख्याका
त्वात्रानवापस्वापरामादीनित्यर्थः किंभूतान् पंचविरल
नेशृत्वंयस्यपंचशावः सिंहलद्वाहरादीप्राक्षीर्ययशा
तेनया यद्वा पद्मसुवोहरः तद्वाक्षगणाश्रीः शोभायेषां

ते तथाप्रविविस्तारैरितिपाण्डुसारात् हरिरिन्द्राद्दस्माव
श्विनीकुमारौ तद्वत्तेजो येषां ते तथा अन्वहं प्रतिदिनं सवन
स्य यज्ञस्यान्तराणि सत्रादीनि अधिगतः प्राप्त इति महीप
तिविशेषणं किंविशिष्टानि स्फुरता देदीप्यमानेन अभ्य
शृङ्गेन युक्तानि विशेषेण विततानि विस्तारितानि ऋत्विजोध्व
र्युणोत्यर्थः सोमाभिमलने प्रसिद्धो वै सवनमध्वर इति वि
श्वः पक्षे सम्महीपतिः पाण्डुः पञ्चपञ्चसंख्याकास्तनया
स्तत्रान्युधिष्ठिरादीनवाप अस्मिन्पक्षे हरिदस्रतेजस इ
ति पञ्चम्येकवचने हरिदस्रतेजसः सकाशादित्यर्थः ह
रिश्च हरिश्च हरिश्च हरयः सरूपाणामेकशेषः हरय
श्च दस्रौ च ते हरिदस्राः तेषां तेजसः अंशादिति धर्माद्यु
धिष्ठिरः वायोः भीमः इन्द्रादर्जुनः अश्विनीकुमाराभ्या
नकुलसहदेवाविति हरिवातार्कचंद्रयमसमीरविष्णु
तिथाश्वतः चतुरोऽपीति महीपतिविशेषणं चतुरोदन्तः
तनयान्किंविशिष्टान् प्रावेनवक्रेण भास्वरा श्रीर्येषाम
किंभूतः वनान्तराणि वनमध्यान्यधिगतः प्राप्तः कथंभूता
नि स्फुरत् ऋष्यो भल्लूको यत्र एवंभूतानि यानि शृङ्गाणि
पर्वतशिखराणि तत्र विस्तीर्णानि ऋष्यस्य पर्वतविशे
षस्य शृङ्गैर्विततानीति वा ऋष्यः पर्वतभेदे स्याद्भल्लूके
प्रेणाके पुमान् कृतवैधन्यलिंगं तन्त्रत्वे पुंनपुंसकमि
ति मेदिनीकरः अयं च कर्षसंयोगवान्मूषकाणां न प्रक
रणे मेदिनीकरः यद्वा स्फुरदृष्यस्य शृङ्गं प्रभुत्वं यत्र तानि
विततानि चेति द्वन्द्वसमासः शृङ्गं प्रभुत्वं शिखरे चिह्नं क्री
डांबुयंत्रके विषाणोत्कर्षयोश्चापि स्मृत्यां नपुंसक इति
विश्वः १९ ॥ कृतार्थता कीदृगहो नृपस्य यदेनमालोकि
तपुत्रमूर्तिः देवः स्वयं धर्ममयः सिषेवे महात्मजन्मापु
रुभाक्तिनम्रः २० ॥ कृतार्थतेति कृतार्थः प्रयोजनम
र्थो जन्मादिना कृतार्थस्तस्य भावः कृतार्थता महान्नृपस्य

रा॰
पां॰
४९

19

ज्ञोदशरथस्य पांडोर्वा कीदृक् अहोवत्क्रमशाक्यत्यर्थः अ-
निर्वचनीयाद्भुतार्थेनेतितात्पर्यं अहोधिगर्थे शोकेचकरु-
णार्थविषादयोः संबोधनेप्रशंसायांविस्मयेपादपूरणेइ-
तिमेदिनीकरः कुतइत्याह यदेति यतोहेतोधर्ममयोध-
र्मरूपीदेवोविष्णुःरामरूपेणावलंबितपुत्रमूर्तिःपुत्रशरीरः
पुत्ररूपोवास्वयमात्मनायदेनंदशरथंसिषेवेसेवितवान्
सकिंभूतोगुरौभक्त्यानम्रःगुरुभक्तिमान् महानुजन्मासत्क-
निष्ठःभरतादिसहितःपक्षेधर्ममयोयुधिष्ठिरोधर्मजन्मे-
तियावत् महानुजन्माभीमादिसहितःअन्यत्समान् १७॥
सलक्ष्मणोन्वीतसमृद्धिरुग्रशत्रुघ्नसम्पद्भरतेनाधितश्रीः
ज्यायान्विरेजेक्रमशोभिरामः कौमारमासाद्यवयःकुमारः
१८॥ सइतिज्यायान् ज्येष्ठःकुमारोरामःशुशुभेराजते
स्मकौमारंयौवनंवयआसाद्यप्राप्यवयःपक्षिणिबाल्या-
दौवयोयौवनमात्रकेइति शाश्वतःनविद्यतेभीर्यस्यसतत्
अभिभयशून्यमिति वयोविशेषणंयद्वाकिंविशिष्टःक्र-
मशःक्रमेणउदितेअभिरामोमनोहरः क्रमेणशोभतेक्र-
मशोभिरितिवयोविशेषणंवाकिंभूतोलक्ष्मणेनअनुजेन
भ्रात्रा उन्नीतासमृद्धिःराज्यसम्पत्तिर्यस्यतथाउग्रंती शत्रु-
घ्नसम्पदस्य उग्रंती शत्रुघ्नस्यसम्पदस्यच भरतेनानुजा-
तेनाधिताधिष्ठिता श्रीर्यस्यसतथा पक्षे ज्यायान् कुमा-
रःयुधिष्ठिरः लक्ष्मणेनराजचिह्नेनचक्रादिनाउन्नीतास-
मृद्धिर्यस्यउग्रंतीशत्रुघ्नीशत्रुहन्त्रीसम्पद्यस्यभरतेनभरत-
कुलोत्पन्नेनराज्ञाधितश्रीः कुमारंयौवनंसमासमित्यमरः
लक्ष्मणेनाख्येनाभिरामभ्रातासमृद्धिः अन्यत्समानं
युधिष्ठिरंभीमधनंजयाभ्यांसमंदधानंनकुलेनलक्ष्मी स-
माद्रवामसहदेवनिष्ठंज्येष्ठंसुतंवीक्ष्यतनोषनानः १९॥
युधिष्ठिरमिति नातोदशरथःज्येष्ठंसुतंरामंवीक्ष्यहृष्ट्वा
तदोवभूव किंभूतंयुधिष्ठिरं संग्रामेस्थिरं अपलायन-

मित्यर्थः भीमेनशिवेन धनंजयेनाग्निनावासमंतुल्यं भीमोग्र
वेनसेग्रो भीमोवृकोदरेइतिविश्वः धनंजयोर्ज्जुनेवह्नौर
नागभिद्द्रुमारुतेइतिमेदिनीकरः नकुलेलक्ष्मीनदधाने अपित
दधानमेवसहमायालक्ष्याय:समः सलक्ष्मीकः तस्मादवाप
प्राप्ते सहदेवनिष्ठयादेवभक्त्यावननेयः सहदेवनिष्ठइतिभाव
तमष्टहे तातः पांडुः ज्येष्ठस्तनयंयुधिष्ठिरंप्रापभीमो भीमसेनः
धनंजयः अर्ज्जुनः नकुलेनमाद्रीपुत्रेणसमं सहदेवोपिमाद्रीसु
तएव अन्यत्समानं १९ ॥ संतानलाभादनृणः पितॄणांहर्षा
दसंभावितपूर्वशापः सार्धस्वदारैरनुभूतकामःसपांडुतोपेक
रतिर्नृपोभूत् २० ॥ संतानेति नृपः दशरथः शक्रतोपेकर
तिःबभूव इंद्राराधनतत्परोभूत् स्वदारैरनुभूतकामः अभिलषि
तपदार्थमनुभूतवान् संतानलाभात्प्राप्तेः पितॄणामनृणः
ऋणमुक्तः प्रजयापितृभिरितिश्रुतेः अतएवहर्षादसंभावितो
विस्मृतः पूर्वशापः मृगमुनिशापः येनसतथा संतानः संततो
गोत्रेस्यादपत्येस्वरुमेइतिविश्वः पक्षे नृपः पांडुः स्वदारैः
समम्ननुभूतकामः संभोगवानासन् तस्मिन्काले परलोकगम
नात्सुरवाराधनतत्परोभूत् इतियोज्यं हर्षः कामोद्रेकः पूर्वशा
पविस्मरणेहेतुः परलोकएव शक्रसेवापरोबभूवेत्यर्थः अ
न्यत्समानं २० ॥ विद्यागुरूणांनिलयादवाप्यकालेकुमाराः
नराष्ट्रमेत्य ववंदिरे भूमिपतिंजनानांविलोचनालीवनिमेषयं
तः २१ ॥ विद्येति कुमाराः रामादयः भूमिपतिं दशरथं ववंदिरे
नस्यप्रणामंकुर्वंतिस्मकालेवंदनोचितसमये आगत्यसमीप
मितिशेषः किंविशिष्टं धृतराष्ट्रं येनतं धृतराष्ट्रं धृतस्यराज्यमिर
ति धृतराष्ट्रः सुराज्ञिस्याद्रागत्वेविभेदयोरितिमेदिनीकरः
गुरूणांविनेयाद्विद्याश्चतुर्दशविद्या अवाप्य गुरूणांनिलयादि
तिपाठांतरे तत्रगुरूणामुपाध्यायानांनिलयाद्गेहाद्विद्या अवा
प्यनिजानानांनिरीक्षकानांविलोचनालीश्चक्षुः परम्परा अनि
मेषयंतोनिमेषशून्याः कुर्वंतः अंगानिवेदाश्चत्वारोमीमांसा
न्यायविस्तरः पुराणंधर्मशास्त्रंचविद्याह्येताश्चतुर्दशेति पक्षे

ह० मा० १०
20

कुमारकाधिष्ठितादृयः पत्य आगत्य अर्थाद्दृष्यश्रृंगपर्वनात् का
लेआगमनसमयेपुनराहृतं प्रज्ञाचक्षुषंपितृव्यं ववंदिरे ऋषिभि
वनीयपुनराज्ञायसमर्पिताः अन्यत्समाने ११॥ गुणैकपेनागुरु
भीष्मस्य धैः तत्रोग्ररूपैर्वचनैर्विनीताः कृपाश्रयाल्लेउलाः शाक
लाशप्रमाणकोटिप्रवणाविजज्ञुः ११॥ गुणैरितिने कुमाराः समा
दृयः विजज्ञुः विहारं चक्रुरित्यर्थः किंविशिष्टा गुणैः प्रकृष्टगुणैः दा
नादिभिर्विद्यादिभिर्वा उपनायकाः कृतनाध्ययना इत्यर्थः कोह
शैः गुरुभीष्मस्य धैः गुरुभिरनवगाहनीयैः भीष्मैः भयानकैः स्व
धैर्मनोहरिभिः दुंदुमति गुरुभीष्मस्य धैरिति रूपं तत्रस्य त्रिय
साउग्ररूपैर्योग्यैर्वचनैर्विनीताः यद्वा षचनैरिति लक्षणे तृतीया
विनीताश्चेति भिन्नमेव वाच्यलिंगो विनीतः स्याद्दमनीते जितेंद्रिये
वलनेनिभृते चापि विनयग्राहिते पि चेति विश्वः कृपाककरुणान
दाश्रयास्तयकाः मककरुणा इत्यर्थः कलाम्रकालकलाश्र
शालाः प्रमाणस्यशालेयत्रायाः कोदावत्रे प्रवीणास्तत्परायणाः
प्रमाणंशास्त्रमर्यादाशालेयत्रा प्रमात्रादिष्वित्यमरः कोटिः स्त्री
धनुषोत्रेसेमंख्याभेदप्रकर्षयोरिति विश्वः प्रवणः क्रमनिम्ना
र्थां प्रह्वेनानचनष्यथे इति विश्वः पद्मेते कुमारायकाधिष्ठिताद
यः तत्राविदुरेण अत्युग्ररूपैर्योग्यैर्वचनैर्वाक्यैर्विनीताः शिक्षिताइ
तियावत् तत्रासूस्रादावियजे प्रतीहारे च सारथौ भुजिष्यान
नयेतत्रानियंके च मत्तासृजेति विश्वः गुरुभीष्मस्य धैरितिव
चनविशेषणं गुणविशेषणं वा गुरुः द्रोणाचार्यः भीष्मोगांगे
यः नयोर्द्वयोः धैः स्वदयंगमैः प्रमोदजनकैरितियावत् कृपः कृ
पाचार्यः नदाम्स्त्रनाइति प्रमाणकोटिः कौरवाणां क्रीडाभूमि
स्तत्रप्रवणास्तल्पमन्यत् प्रमाणमियत्रामर्यादावाकोदंडाय
नुरथेयस्याः साप्रमाणकोटिः धनुषः शिक्षाभूमिमिति ११॥
नेम्निग्धगंभीरगिरः कुमाराः स्तैलोकयतापप्रशमैकदत्ताः
नवांबुवाहाइवधानेनावृष्णाउद्वेजयंतिस्मविपद्भूतान् १३॥
नरंगनिवामादयः कुमाराश्वंविपदाउद्वेजयंति अहिमानगु

वंतिस्मेतिस्तदः स्मेइतिभूतेपिसङ्ग नवांबुवाहाइवेति यथानवमे
घाः धार्तराष्ट्रानसितचंद्रचरणहंसान्द्वेजयंति विपक्षानिति उ
भयंविशिनष्टि स्निग्धेति स्निग्धाः सत्त्वरागंभीराश्चोषवंत्योगिरो
वाचोयेषामितितथा पक्षे स्निग्धाः स्रवणस्वच्छागंभीरा बह्व
ष्टुषाव्यापिन्योगिरः शाखायेषामिति त्रैलोक्यस्यलोकत्रयस्यताप
नाप्रद्वेगानांसंतापानांवाप्रशमेनिराकरणेदक्षाः ऊष्मलाः ध
नादित्यानाद्ययप्रशमनाच्छलोकस्यभवेनजनेइतिशाश्वतः
पक्षोबलेपतत्रेचपार्श्वेसाध्यसहाययोरितिविश्वः विशिष्टः
पक्षोयेषामितिविपक्षानिति धार्तराष्ट्रोपिनस्यांचिहंसकौरव
योः स्मृतः इतिमेदिनीकरः भावनपक्षे तेजमारायधिष्ठिरः द
यः धार्तराष्ट्रान् धृतराष्ट्रसुतान्विपक्षान्दुर्योधनादीन् विपक्षा
न् विशिष्टपक्षान्सहायसहितान् विरुद्धेजयंतिस्म धनादि
दानात् त्रैलोक्यतापप्रशमनदक्षानवांबुवाहाइवजलसेचने
नेतिग्रन्थसमानं १३ ॥ उरुरूपोपनतास्त्रविद्ययासमधि
कंपरिबृंहिततेजसः पवनसंगतपावकसंनिभान्पक्षताः प
रभीषणतांदधः १४ ॥ गुरुरूपेतिन्यपक्षतारामादयः प
रणांशत्रूणांभीषणतांभयंकरत्वंदधः दधतिस्म अत्रहेतुविशे
षणमाह पवनेनवायुनासंगतोयोवह्निस्तत्संनिभास्तत्तुल्याः
स्तद्वत् तेजस्विनइत्यर्थः कुतएवमित्याह गुरुणामध्यापकानांविश्वा
मित्रवसिष्ठादीनांकृपयाउपनतया अस्त्रविद्यया धनुर्वेदस्तया
समधिकंमत्यर्थंपरिबृंहितंतेजोयेषांतेतथा हरिहराविति धा
तुस्मरणात् पक्षेन्यपक्षतायधिष्ठिरादयः गुरुः द्रोणाचार्यः
कृपाकृपाचार्यः ताभ्यामुपनीतया अस्त्रविद्यायेतिशेषं सः
मानं १४ ॥ रसमसंगैरपराजितानांद्विजिह्वमौर्गैनेवपीकृता
नां तीव्रप्रतापज्वलनेनतेषांभाव्यंभयंशत्रुगणोनुमेने १५
रसेति तेषांरामादीनां भाव्यंभयं भाविभयं शत्रुगणोनुमेने
अनुमानितस्म स्वीचकारेत्यर्थः कर्मकरणयोः कृतीतिषष्ठी
नतकर्त्रिकंभयमित्यर्थः अत्रहेतुमाह तीव्रेति तीव्रोभिनवो

यःप्रतापः सएवज्वलनोवह्निस्तेनभाव्यंभयमतिशौर्यशालि
त्वादित्यर्थः तेषांप्रतापज्वलनेनहेतुनाशत्रुगणेनभाव्यंभय
मनुमेनेऽतिवा किंविशिष्टानांरसस्यशृंगारादेःप्रसंगेप्यपरा
जितानामवशिष्टानामित्यर्थः द्विजिह्वेति द्विजिह्वस्य हृचक
स्याखलस्यमार्गैर्वचनादिभिरवशीकृतानांदुर्जनकर्मभिरना
कृष्टानामित्यर्थः पक्षे तेषांयुधिष्ठिरादीनांशत्रुगणोदुर्योध
नादिभाव्यंभविष्यद्भयमनुमेने तेषांभयकर्तृकमितिवा ती
व्रप्रतापज्वलनेन तीव्रःप्रतापोभितापोयस्यतादृशोज्वलनो
वह्निस्तेनलाक्षागृहवर्तिनेत्यर्थः तथारसस्यविषस्यप्रसंगे
रपराजितानांनष्टानामितियावत् द्विजिह्वेतिद्विजिह्वमा
र्गैरपिकृतदंशादिनामार्गैरपिनवशीकृतानांनव्यापादिताना
मित्यर्थः द्विजिह्वायकैर्मार्गैर्वा शृंगारादौविषेवीर्येतिक्तादौ
द्रवरागयोः दाहप्रभेदेचतथापारदेवादयेरसइतिविश्वः द्वि
जिह्वस्तुखलेसर्पेइतिमेदिनीकारः केचित्तु तीव्रप्रतापज्वल
नेनलाक्षागृहवर्तिनावह्निनातेषांयुधिष्ठिरादीनांभाविभयम
नुमेनेपरस्परंस्वीचक्रेजतुगृहानलेनामीषांमारणंविधीयता
मिति परामर्शंचकारेत्यर्थः अतएवरसप्रसंगेविन्यादिहेतुग
र्भविशेषणद्वयं ३५ ॥ एवंकालेयातिभ्रमारिरदोदीव्यस्त्रेतो
वाधितंगाधिजन्मा भीमद्वेषीभूमिपालंययाचेदायादस्यप्रेष
णांधर्मयोनेः ३६ ॥ एवमितिपूर्वोक्तप्रकारेणकालेगच्छतिस
ति गाधिजन्माविश्वामित्रःभूमिपालंराजानंदशरथंदायादस्य
सुतस्यप्रेषणंप्रस्थापनंययाचेयाचतेस्म दुहियाचीति द्विक
र्मकत्वं दायंविभाज्यंधनमादत्तेइतिदायादःसुतः दायादौसु
तबान्धवावित्यमरः धर्मयोनेर्धर्मस्योत्पत्तेःकारणभूतस्यस्त्री
पुंसयोस्तुयोनिःस्यादाकारेस्मरमंदिरेइतिविश्वः धर्मयोनेरि
ति हेतुपंचम्यंतंवा तथाचगीतायां यदायदाहिधर्मस्यग्ला
निर्भवतिभारत अभ्युत्थानमधर्मस्यतदात्मानंसृजाम्यहं
गाधिजन्माकिंपुनःभीमस्यभयंकरस्यद्वेषीकिंकर्तव्यययाचे

रवेः राहुसंयुक्तविध्योत्पादकं बाधितं चातितमिति ज्ञात्वैकव
चनं रवेः किंविशिष्टं भग्नारिः भग्नः अरिः शत्रुः येन तत् भग्नारिः
अन्यच्च किंविशिष्टं दुःखशोकतः दीप्यत् सोत्साहश्चेतोहृदयं य
स्य तं भीमदेवी दुर्योधनः भूपालं धृतराष्ट्रं धर्मयोनेर्युधिष्ठि
रस्य वायादस्य ज्ञाने प्रेषणं प्रस्थापनं वनाय प्रेषणं ययाचे स
किंविशिष्टः भग्नाविदारिताश्चारिवृत्ताः शत्रुरक्षणं येन सः अन्य
च्च किंविशिष्टः दीप्यस्वेनावाधितं गादिजन्मा दीप्यत् सोत्सा
हमहर्षं चनतत् तेजः दुःखश्चेतः वाधितं शीलमस्य दीप्यश्चेतोर
वाधीताच्छेल्येगानिः ताहृशोयस्त्वंगः महान् ताचिः मनःपीडा
तस्य जन्म यस्मिन् पुंस्याधर्मान समीप्ययेत्यमरः ७९ ॥ धर्मा
त्मानं प्रेषयामास विश्वामित्रप्रीत्या सानुजं भूमिपालः तद्वा
क्यानोदत्तकर्णानुमोदः पुत्रप्रीत्या जानकशुक्लः कुमारं ७७ ॥
धर्मात्मानमिति भूमिपालो दशरथः कुमारं रामं विश्वामित्र
स्य प्रीतये सानुजं सलक्ष्मणं वनं प्रस्थापयामास किंविशिष्टं
धर्मात्मानं धर्ममर्मवं साकिं भूतत्वस्य मुनेः वाक्यानि वाक्याव
साने दत्तकर्णः वक्तान श्रवणविषयेन मोदः वाधादिनादे
नानुमोदनं यस्य यद्वा दत्तकर्णत्याद्विश्वामित्रस्येति अनुमो
दोहर्षः इतिवा राजवचनात्तु तस्य कर्णानुमोद इति भावः प
क्षे भूमिपालो धृतराष्ट्रः धर्मात्मानं धर्मपुत्रं कुमारं युधिष्ठि
रं सानुजं वनं प्रेषयामास किमर्थं विश्वामित्रेति विश्वेषाम
मित्रो दुर्योधनः तस्य प्रीतये प्रेमार्थं देशादस्य प्रेषणं क्रियता
मिति दुर्योधनवाक्यानि दत्तकर्णानुमोदः स्वीकारो यस्य स तथा
पुत्रप्रीत्या युधिष्ठिरप्रीत्या जानकशुक्लः जानकष्टः यद्वा पुत्र
प्रीत्या पुत्रस्य दुर्योधनस्य प्रेम्णा करणेन युधिष्ठिरत्यागेन जा
तकष्टः वाजपेयस्य यूप इतिवत्पुत्रस्य संबंधषष्ठी पुत्रप्री
त्या धर्मात्मानं प्रेषयामासेति योज्यं अजानकष्ट इति अका
रप्रश्लेषाद्वा तत्र पुत्रात् दुर्योधनादीनां प्रेम्णा जानकष्टोहृदयेन
तमकष्ट एवेति भावः ७७ ॥ मात्रा सम्म सावकजः सरामः प्र

रा॰
मं॰
११
22

प्रस्थापितो धामतपोधनानां स्थानांतरं विद्विषतां रणेषु समर्थ
कोदंडधरः प्रतस्थे १८ ॥ मात्रेति स रामः स्थानांतरम् अयोध्याया(
देशांतरं प्रतस्थे प्रास्थितः विश्वामित्रतपोवने प्रतिजगामेत्यर्थः
किंविशिष्टो मात्रा समं रामजनन्या कौसल्यया सह राज्ञा दशरथे
न तपोधनानां नृपाविनां धामगृहं प्रस्थापितः कौसल्यासहिते
न दशरथेन वनं प्रस्थापितमित्यर्थः सार्धं साकं समानेषु सम
स्यादभिधेयवदिति विश्वः तथा सावरजः सकनिष्ठो लक्ष्मण
सहितः विद्विषतामिति शत्रूणां रणेषु समर्थकोदंडधरः सम
र्थः सन् धनुर्धरः समर्थो वा यः कोदंडं धारयतीति पक्षे ।
सयकोपिशिवः स्थानांतरं देशांतरं प्रतस्थे मात्रा समं कुंत्या सह सा
वरजो भीमादिसहितः राज्ञा धृतराष्ट्रेण ग्रन्यस्माने १८ ॥
परिकल्पितकामदेहदाहं विषयं प्राप्य सवारणावतंसः अ
विशंकमुवास तत्र भास्वद्द्युतिलाक्षाभवने प्रदोषरुद्रः १९ ॥
प्रवेति स रामः तत्रस्थानांतरे अविशंकं शंकाशून्यं यथा भव
ति तथा उवास उषितवान् प्रदोषेण रात्रिमुखेन रुद्रः संध्या
कालस्य हृतत्वात् तत्र स्थानांतरे किंविशिष्टे भास्वदिति भा
स्वतः आदित्यस्य दीप्त्या लाक्षाभे लाक्षासदृशे लोहिते वने यत्र
यद्वा मदनाश्रमावस्थित्या सदैव नदवास्थितेः सदापल्लवत्वा
ल्लोहितत्वे शालाक्षाभवनं यस्येति रणावतंस इति रणावतंस
इव शोभाकारः वा शब्दश्चार्थे भिन्नक्रमः विषयं वा विषयदे
शं प्राप्येति स किंभूतं तं परमत्यर्थं कल्पितो जनितो यो
वनकामस्य कंदर्पस्य देहदाहो यत्र तथाविधोपि भयजनक
स्थाने निःशंकमुवासेति शोर्यातिशय प्रकटनार्थं कामदेव
दाहकेनाग्निना वा लाक्षाभवनत्वमिति पक्षे सयकोपिशिवो
वारणावतं नगरप्रदेशं तेन सहवर्तते यः स तं सवारणावतं न
गरप्रदेशं तेन सहवर्तते यत्तं स विषयं देशं प्राप्य अविशंकं नि
भयं यथास्यात्तथा उवासेति भास्वती दीप्ता या कालिनी अ
लाक्षाभवने लाक्षाणामिवगृहे ज्वालिने लाक्षागृहे इत्यर्थः प्र

दोषैः प्रकृष्टैर्वीतोत्कैर्वा प्ररोचनादिभिर्द्वैयों परसेवकैरतुलद्धः
परेण शत्रुणा कल्पित आकांक्षितः कामेन इच्छया देहदाहो य
त्रेति दोषः स्यात् दूषणे पापे द्वेषे गां त्रौ भुजेपि चेति विश्वः परेण
शत्रुणा कल्पितः समर्पितः काममत्यर्थं देहदाहो यत्रेति वा
यथा शिवेन कंदर्पदेहे दाहः कल्पितस्तथायमपीति ७१ ॥
उपनतजनत्क्रमस्तात्क्रमार्गे चतस्मिन्विडरवचनमात्रादाम
भावेनस्पृष्ट्वा एवन् अनयदपि कियंतं कालमालोच्य कार्यप्रक
टितगूढभाक्तिः सानुजो राजहंसः ७० ॥ उपनतेति सानुजः
सलक्ष्मणो राजहंसो रामलक्ष्मणेनागतपोवने कियंतमपि का
लमनयदतिवाहितवान् कार्यगौरवान्ना परिपालनरूपमा
लोच्य विमृश्य पनदृगुरोपेनेत्यर्थः देवतां कार्यं रावणवधरूपं
वा किं विशिष्टे उपनेतानुगतेनजनेनलक्ष्मणो निर्मितः स्थाप
नीयो मार्गो वर्त्म यत्र विडरेति विडरस्य ज्ञानिनो गरस्य विश्वा
मित्रस्य वा वचनमात्रभावेन स्पृष्ट्वा एवन् आकलयन् आत्मदूरवर्त
मीपयोरित्यमरः पक्षे राजहंसः युधिष्ठिरः सावरजः सभी
मः भाविकार्यं वैरादिरूपमालोच्य कियंतमपि कालं तत्रा
लोकयत्तत्र लाक्षागृहे उपनतेनविनीतेन भीमाख्येन जन
नेच्छुपोभूमेर्वधस्तात्मार्गो निर्गमणमार्गो यत्र आश्चास्य कौर
वमंत्रिणो वचनं स्पृष्ट्वा एवन् अतएव प्रकटतानगूढभाविये न
सतथा निर्गमनमार्गोपि विडरेणैव तस्योपदिष्ट इति स्फुरति:
विडरो नागरे धीरे कौरवाणां च मंत्रिणि इति विश्वः ७० ॥ स्वा
यमेधित चित्रभानुहेतिस्फुरितां तावसतिं विहाय भूयः स व
नांतरमुपनतारिभीमः स्वग्रहभूतफलैर्धपनः प्रपेदे स्वयमिति
स रामः वनांतरं प्रपेदे प्रपन्नस्ततोन्यत्र जगामेत्यर्थः तां वस
तिं विहाय त्यक्त्वा इति किंभूतां स्फुरितां शोभायमानां किं भू
तः पथितः समुत्थितास्त्रीणां नानाविधाहेतयो यासां तादृशा
हेतयो ज्वाला यस्य स तथा पथित चित्रभानुहेतिः स्वयमेधित
जैनीयस्यलोपो वक्तव्य इति विसर्जनीयलोपः तथा तपनाः से

ए० पां० ३३

23

यामायोयत्ताये अवयः शाखवत्तेषांभीमोभयंकरः स्वयमाष्ट
नधरः अवतात्रूपायाधारकोवोस्येति पद्देमरूपयिष्णुरःस्व
यमात्मनैवपथितोवार्धितास्त्रिअभावृषीक्रितस्यहेतिज्वाला
तयास्फारितोदह्यमानानामिति लात्वाग्रहद्रूपोवसतिविड
रोमदेशाद्धिहायावनान्तरंप्रपेदेवितिशोषसमाने हेतिःस्याद्
रूथेज्वालेहेतिमित्तवाणानेतसीतिविश्वः चित्रभानुःस्वेगेनले
पः॥ विलंघ्यगंगांव्रजतः सुदूरमाम्लानदेहस्यबलात्प्रभा
वात् तस्याग्रतः सुंदरतोज्वलांगीनिशाचरीप्रादुरभून्मदांधा
पः॥ विलंघ्येति तस्यभीमस्याग्रतोनिशाचरीनाटकाभिधार
नाराक्षसीप्रादुरभूत्प्रकाशंगता प्रकाशेप्रादुराविःस्यादित्य
मरः किंविशिष्टामदांधेति मदेनमत्ततयागर्वेणवा अथावि
वेकशून्यादर्पायेत्यर्थः तथास्वदेशानवविशेषस्वामिनिरता
अत्रक्षासुंदरता उज्ज्वलांगीज्वलतीतिज्वलः ज्वालाउन्नता
ऽधंगताज्वालायत्रईदृशमंगंयस्याःसाअत्रवेनोल्कात्यागेऊ
वेतीत्यर्थः बलायाः विश्वामित्रदत्तायाविद्यायाः अप्रभावा
त् अम्लानदेहस्य अम्लानशरीरस्यगंगांविलंघ्यनीत्वासुदू
रमतिदूरंदेशान्तरंव्रजतः भारतमते तस्यरूपयिष्णुरस्यब
लात्प्रभावात् बलस्यशक्तेरप्रभावात् अम्लानदेहस्यहिडिंबा
नामानिशाचरी मदांधाकामोन्मत्ताकामुकीतस्यासुंदरस्य
भावः सुंदरतानया उज्ज्वलांगीरस्यागीतल्पमन्यत् मसौदेर
तस्यकात्यांगवैहर्षभदानयोरितिमेदिनीकारः अथतत्
मिवेक्षीवचत्वहीनेतनाइति पः॥ स्वेगचलितोद्य
लात्वगम्यगाद्धिडिंबावलीतिरंतरतरोदर्शनकद्वितीणा
साक्षात् निरीक्ष्यपनंदनंभावरकोशिकेकानने दृशां
तरुणपागमत्किमपिकामचारोद्भूते स्वेगेति सानंदकानि
श्याचरी किमप्यनिर्वचनीयदर्शानरमवस्थांतरमसौम्यदू
पल्लवसुपागमत् उपागता द्वाणानिमेशाहानवकानने स्वप
नंदनंतामंनिरीक्ष्यहृष्टेति किंभूतेकानने शाखः सशाखोमहा

स्वनवान् कौशिकः विश्वामित्रोयत्रदर्शनांतरेकिंभूतंकामचा
रेणस्वेच्छयाकरणेनोद्धुरं स्वेच्छयाजनितं साकिंभूता स्ववे
गेनचालिताःचंचला अतएवोच्छलंतोयेखगाःपक्षिणस्मृगा
श्चारण्याःपशवःअहयःसर्पाः तेषांयाडिंबावली कालवे
ष्टावलीतयानिरंतरमत्यर्थं व्याममुदरंयस्यास्सातथा यद्
ह्रासेवगचालिताः उच्छलनखगमृगाहयोयस्यास्सातादृशी
चडिंबावलीनिरंतरतोरोदरीचेतिद्वंद्वसमासेरूपं स्ववेगचा
लितोच्छलत्खगमृगाहयोयत्रएवंभूतयाडिंबावल्यानिरं
तरमुदरंयस्याइतिवा डिंबोभयध्वनावर्णेभूरुसीहति
स्ववृत्तिमेदिनीकरः तथाक्तनकेकपटेदक्षिणादत्ताः
यद्वाक्तनकाक्तविमोदक्षिणाःसरलोवामादिवीयस्याःसा
तथादक्षिणाःसरलोवामःपरिच्छिद्यतइतित्रिषु त्रिषुपार
टोभवेमित्रेयाचदानप्रतिष्ठयोरितिविश्वः कौशिकोपि
नलेव्यालयाहेतुगुल्लग्राक्रयोः कवोत्तोल्लकयोस्तुस्या
द्विश्वामित्रमुनावपीतिमेदिनीकरः पक्षे साहिविवाना
मरादत्तमील्यप्रस्ततंभीमेनिरीक्ष्य किमप्यानिर्वाच्यंदर्शनं
तरंमन्मथसंचारेणेष्टमवस्थांतरमुपागता तद्दर्शने
नमन्मथविकारवतीबभूवेत्यर्थः भुवरोत्यर्थं सशोभः
कौशिको उल्लूकोयत्रतादृशोवनेकथंभूता स्ववेगचालि
तअतएवोच्छलंतःखगमृगास्त्रयस्यास्सास्ववेगचालितोच्छ
लत्खगमृगा तथावलीभिस्त्रिवलीभिःनिरंतरमनवका
शंतलंयत्रतादृशामुदरंयस्यास्सातथेति बलयोरैक्यात्
दशावस्थादीपवर्तिर्वस्त्रांतेभूम्नियोषितीतिमेदिनीकरः
तलेखरूपेतद्धेलीलावेश्याचानवारणेइति ८३ ॥ विष
मेषुमहारातीहत्वातापततोद्भुतं साहिडिंबस्पशाकलेव
पुस्मात्पिशिताशिनः विषमेति सुरामःपततःपक्षिणः प
तत्पतत्रिपतगेत्यमरः पिशिताशिनःमांसादान् डिंबस्य
कालखंडस्पशाकलैःखंडैरथोन्नाटकायाः प्रसृमान् हिःपा

रा॰
मा॰
२४
24

दग्धवाणो ऽङ्गतं भ्रात्रंतादृकां विषमस्यानिशितस्य इषोबाणस्य प्र
हारेण आर्तां पीडितां कृत्वा संपाद्य हन्तीच्छन्ते स्फुलो स्फुल्लो
शनाशं दिशतीत्यादिवर्तकारस्याद्वित्वेप्यत्रश्लेषेनदोषः तस्मा
उरःस्थले बाणेनानिशितेन संपाद्येत्यर्थः पक्षे भीमः आपत
तो आगच्छतः हिडिंबस्य राक्षसविशेषस्य शाकलैर्देहखंडैः र
पिशिताशिनो गृध्रादीन्पादिणः अप्रसात् तां हिडिंबां विष
मेषुः पंचबाणः कामः तस्य प्रहारेण तां कृत्वा विधाय स्वकी
येन दर्शनेन स्मरबाणविद्धां कृत्वेत्यर्थः ८४ ॥ प्रतीपदर्शि
नी सैषा विचचारास्य यत्याथ ततो गुरुगिरा तस्याजीवितेशो
बभूव सः ८५ ॥ यतो हेतो रामस्य पथि मार्गे सैषा ताड
का प्रतीपदर्शिनी विपरीताचरणानि कामद्वेषिणी विचचा
र बभ्राम ततो हेतोः गुरुगिरा विश्वामित्रवचनेन तस्याः ताड
काया जीवितेशो यमः स रामो बभूव पक्षे अस्य भीमसेनस्य
सैषा हिडिंबा पथि मार्गे प्रतीपदर्शिनी वनिता विचचार तेजा
ता ततो हेतोः गुरुगिरा गुरोः ज्येष्ठभ्रातुः युधिष्ठिरवचनेन त
स्या हिडिंबाया जीवितेशः स्वामी बभूव प्रतीपदर्शिनी वामा
वनिता महिला तथेत्यमरः जीवितेशो यमे प्रेयसि त्रिषु स्याज्जी
वितेश्वरे इति विश्वः ८५ ॥ वचनमात्मगुरोरतिहृष्टताल्पप्र
तेन समेत्य निशाचरी अनुपतत्पिशिताशिघटोत्कचासमय
यत्क्रमपायमवापसा ८६ ॥ वचनमिति सानिशाचरीत
टकासमये यत्क्रं याममपायं मरणमवापस्तनवती किंभू
ल्पान्यपस्तेन रामेण संगत्य मार्गे मिलित्वेति किंभू
आत्मगुरोः विश्वामित्रस्य वचनं कुर्वता सा किंविशिष्टेन
तमस्थात् पततो पिशिताशिनो घटापिशिताशिनां किंविशिष्टा अ
घटासमन्ताद्दीयत्र नाम्नी उल्का वा उदन्तकेषां च अनुपतत्
पिशिताशिघटोत्कचाभिन्नं वा पदं दृश्यमेतादृति पक्षे सानि
शाचरी हिडिंबा समय यत्क्रं व्यवस्था समय सहितेन मपायंवि
श्लेषमवापस्मरणसमयेसमागामिष्यामि इति व्यवस्थासम॰

यः आत्मगुरोर्याधिष्ठिरस्य वचनमनुतिष्ठन्तात्पर्यहतेन भीमे
न समेत्य स्वामिभावेन समागम मेत्य स्वामिभावेन समागम
मेत्य अनुपश्चात् भीमसमागमादनुपतन् बहिर्भवन् उ
दूरादित्यर्थः पिशिताशीमांसभक्षकोरादसोयदीत्वाशा
नामस्तोत्रीयस्यात्मा ८६ ॥ महामुनेः प्राप्तवतस्तपोवनेन
रेन्द्रसूनोरर्थधर्मजन्मनः सद्भावनत्रस्यपराशरोद्भवप्रसा
दलाभेन बभूव निर्वृतिः ८७ ॥ महामुनेरिति नरेन्द्रसूनो
रामस्य पराशरेष्टानिर्वृतिः स्वास्थ्यं बभूवेति ज्ञातइत्याह प्रा
रब्धुणाद्भवः उत्पत्तिर्यस्य एवं भूतस्य प्रसादस्य लाभात् अ
र्थीक्तिभिः कृतस्य पारेणनादेकाव्यापादनात्तपोधनानां भ
यहानिर्जातेति संतोषात्प्रसादोजातइति धर्मजन्मनो धर्मो
त्पत्तिस्थानस्य महामुनेः कौशिकस्य तपोवनं प्राप्तवतः एवे
नरेन्द्रसूनोः राजपुत्रस्य धर्मजन्मनो याधिष्ठिरस्य पराशरोद्भ
वप्रसादलाभेन पराशरान्मुनेः उद्भवो यस्य सः व्यासः तस्य यः
प्रसादः इन्द्राराधनायनपस्यां जविंत्य एवं रूपः उल्लाभेन महा
मुनेः शालिहोत्रस्य तपोवनं प्राप्तवतइति निर्वृतिः स्वास्थ्य
तावस्येसमाने पाण्डवोऽहियामिति अन्यत्समानं ८७ ॥
तेनैव केन गुरुणा सनिर्वृत्तप्रयोजनः एकचक्राहितगति
र्भास्वानिवतदर्थभी ८८ ॥ तेनैवेति सरामः तदर्थभी १
गुरुभे किं भूतस्तेनैव एकेनाद्वितीयेन गुरुणा विश्वामित्रे
णनिर्वृत्तं सम्पन्नं प्रयोजनं यस्य सतथा एकचक्रेऽश्रेष्ठार
जेय आहितागतिर्येन सतथा कइव भास्वानिवेति भास्वार
निवेति भास्वानिव एकचक्रेण एकरथाङ्गेनाहितगतिरि
ति एवे सयाधिष्ठिरः गुरुणा व्यासेन एकचक्रेणनगरावि
शेषेण आहितागतिर्येनेति चक्रः कोकः पुमान् स्त्रीवं वत्रे
सैन्यरथाङ्गयोः राष्ट्रे देशान्तरे ॐ भकारो मकरणास्त्रयोरिति
विषः ८७ ॥ तस्मिन्प्रदेशे कौशिकवनेन्द्रपसूनोः रामस्यसं
गान्मनायभावं सरदकत्वं प्रपन्नेगाने सनि मुनीनां तत्रपावनवा

रा॰ पा॰ ५५
७

तस्मिन्प्रदेशेल्पमहत्तुसंगात्तनाथभावं सहसाप्रपन्ने क्रतुक्रि
यासक्तधियांमुनीनां रक्षोनिमित्तंभयमुद्दिदीपे ८८ ॥ तस्
मिन्निति तस्मिन्प्रदेशेकौशिकवने ल्पमहतोः रामस्यसं
गात्तनाथभावं सनाथकत्वंप्रपन्नेगतेसति मुनीनांतत्रपाव
नवासिनां रक्षोनिमित्तंराक्षसजनितंभयमुद्दिदीपे उद्दीप्तं ते
षांकिंविशिष्टानां क्रतुक्रियासु यज्ञक्रियासु सक्तार्थीबुद्धि
र्येषांतथा सहसाहठात्तदनर्थकनिमित्तमर्थः पद्ये तस्मिन्प्रदे
शेशालिहोत्रतपोवनेरक्षोवकनामादैत्यः तन्निमित्तंतेउत्
पन्नेल्पमहतवः कपिष्ठिरादयः अन्यसमाने निमित्तंहेतु
लक्षणोरिति मेदिनीकरः ८९ ॥ रक्षोहितद्विजायत्तदृष्टि
मात्राभिनोदितः महदानंदनोयत्नमानस्योल्पनंदनः ५०
रतइति ल्पनंदनोरामः यत्नमानस्यो रक्षोवधायसावधा
नोबभूवेत्यर्थः कथंभूतः महतांदेवानामानंदः आनंदजन
कः आनंदयतीत्यानंदः तथाकिंविशिष्टः रक्षसामहिताव
दोहिताः द्विजाः ऋत्विजास्तेषामायत्तात्तदभिमुखंवेदिमायाह
श्यत्तन्मात्रेणाभिनोदितः प्रेरितः दृष्टिसंज्ञयारक्षसांवधार
येनेतिर्यक्काइति रक्षांसिग्रहितानियेषांते रक्षोहिताइति
वा आयत्तनेजितेतदिमेक्लिशितेऊपितेपिचेतिमेदिनीक
रः पद्ये महद्वायकस्यानंदनोमहदानंदनः ल्पमहतोभी
मः यत्नमानस्याविति किंविशिष्टः मात्राजनन्याऊंत्याद्र
भिनोदितः प्रेरितस्तीर्थकदैत्यंजहीति कथं रक्षोहितद्विजा
यत्तदृष्टि रक्षोहिताद्विजेरायत्तादृष्टिर्येनेति क्रियाविशेष
णं ५१ ॥ मारीचेष्टमतिष्ठकारिणामसौमित्रिआश्रमस्यायि
नौ विप्राणामभयार्थमस्त्रविधेर्गोमातृगोरातृया सघः सा
ग्रचरंनिशाचरपतिंभीमः सुबाहुंवरणेदोर्वीर्यराजचानवीर
पदवीमाकुस्थयोरांबकं ५२ ॥ मारीचेति असौरामः सुबा
हुं सुबाहुनामानंनिशाचरपतिंराक्षसश्रेष्ठंजघानहतवा
न् भीमोभयानकः गुरोः कौशिकस्याज्ञया अस्त्रविधेर्यत्र

क्रियायागोमारुतकः सुबाहुं किंभूतं मारीचस्यतद्भ्रात
राक्षसस्येष्टमियं मारीचेष्टं तथासानुचरं ससैन्यं बाणैः सं
ग्रामे अनिष्टकारिणमर्थान्मुनीनां द्विषामिति द्वौ वीर्येण
वाहुवलेन वीरपद्वी वीरमार्गमाक्रम्य घोरां वकं श्रेवंवा
बका माताताटका निशाचरी चेरञ्वकायस्यताडशा
चोरे श्रेवकेनेत्रेयस्येतिवा किमर्थमित्याह सिद्धाश्रमे
तस्मिंस्तपोवनेस्थायिनामवस्थितानां विप्राणामभया
र्थमिति भारतपद्वे असौ भीमः निशाचरपतिं वकं वक
नामानं जघान किंभूतं सुवाहुं शोभनभुजं घोरं कादिनां
वीरस्यपद्वीरस्यपद्वीमाक्रम्यगणेयकाधिपस्यात्मया
कथंभूतं वकं मारीचेष्टं मारीजनतृष्यारस्तत्र चेष्टायस्यत
मिति मारीचस्यानन्दयेद्गतिमेदिनीकरः ५१ ॥ भूच
रद्विजगणाशिनां द्विषं वेचरद्विजगणाशनेनतस्तं विचा
यत्कुलमग्रजन्मनो राक्षसतयकरो रवनः ५२ ॥ भूच
रेति सरामः अग्रजन्मनां विप्राणां कुलेसमूहं खरवद रात
मानां तृयंकरोतीति राक्षसतृयकरः तं द्विषं सुवाहुं वे
चरद्विजगणाशनं वेचरंतीति विचराः आकाशचारिणो
द्विजाः पक्षिणो गृद्ध्राद्यस्तेषामशनं भोजनीयं कृत्वा तं
कथंभूतं भूचरेति भुविचरंतीति भूचराः ये द्विजा विप्रा
स्तानशितं भक्षितं शीलं यस्यैवंविधं पद्वे सभीमः द्विषं
वकं कुलं जनपदे गेहे सजातीयगणेपि वेति विस्रः दंत
विप्राद्या द्विजा इत्यमरः भूचरद्विजगणाशनभोजनं
यस्येति भूचरद्विजगणाशनः ताडशं वा ५३ ॥ द्विजरा
जगवीभिः संवर्धितश्रीर्नृपात्मजः जगदानंदयन्सादा
स्कामदेवइवावभौ ५४ ॥ नृपात्मजो रामः कामदेवः कं
दर्पस्तद्वद्वभौ शुशुभे द्विजराजो ब्राह्मणश्रेष्ठः कौशिका
स्तस्य गवीभिर्वाणीभिः संवर्धिता श्रीर्यस्य सतथा कंदर्प
स्यापि द्विजराजस्य चंद्रस्य गवीभिः किरणैः संवर्धिता श्रीर्भव

रा॰
पां॰
२९

नीति यद्वा एतत्काव्यकारयितान्दपः कामदेवनामातद्व
भौ सोपिब्राह्मणाशीर्वादैः संभृतश्रीर्द्विजराजस्य चंद्रस्य
तिद्विजराजगवीतिस्यत्र गोरद्वितल्लकीनिवनसमामानः
गविषाद्वोपीतिकेचित् एतेन्दपात्मजोभीमसेनोद्विजवार
जगवेभिः शालिहोत्रतपोवनवासि ब्राह्मणाशीर्वादैः सं
भृतश्रीः शत्रोः धर्मकदैत्यस्य विनाशनादिति गोशब्दः पश्च
भूमिष्ववागर्थे इति शेषः॥

॥ इतिश्रीहलध
राणीप्रसूतकादंबकुलतिलकचक्रवर्तिश्रीकामदेवप्रो
त्साहितकविराजपंडितविरचिते राघवपांडवीयेकाव्ये
कामदेवांके महाकाव्ये श्रीरामयुधिष्ठिरोनामप्रथमः स
र्गः ॥ समस्तप्रक्रियाविराजमानविरुदराजकं मस्त्रश्रीम
न्नारायणपरायणराजाधिराजश्रीमदनसिंहकारितस्त्री
शशिधरकृतौ राघवपांडवीयप्रकाशे प्रथमः सर्गः ॥ १ ॥
ॐ श्रीगणेशायनमः ॥ ॐ रूपेण कन्यां जनकेन दित्सिताम
योनिजां लंभयितुं स्वयंवरे द्विजप्रवर्येण स धर्मनंदनः सहानु
जस्तां भुवमप्यनीयत १॥ द्विजप्रवर्येण ब्राह्मणश्रेष्ठेन कौ
शिकेन स धर्मनो नाम स्तामपि भुवं धर्मजनकराजधानीं मि
थिलामनीयत नीतः धर्मेणानंदयति लोकान् धर्मनंदनः
धर्मं नंदयति वा धर्मप्रधानादित्यर्थः किंभूतः सहानुजः स
लक्ष्मणः किमर्थमित्याह कन्यामिति न योनिजा ताम
योनिजां स्वयमुत्पन्नां कन्यां लंभयितुं प्रापयितुं किंभूतां
जनकेन जनकनाम्ना नृपेण दित्सितां परस्मै दातुमिष्टां
स्वयंवरेणेति शेषः सीतया रामविवाहनिमित्तेन च नीत
इत्यर्थः पक्षेऽपि भिन्नयुग्मो द्विजश्रेष्ठेन शालिहोत्रतपो
वनवासिना सोपि धर्मनंदनो कपिष्ठलां भुवं द्रुपदनग
रीमनीयत रूपेण द्रुपदेन जनकेन यज्ञोत्पन्नां पित्रा प्रयो
निजां यज्ञकुंडोत्पन्नां कन्यां द्रौपदीं लंभयितुं साग्रजो भीमा

रिरुद्विजः १ ॥ मार्गेषु यो दीर्घतमः स्मृतस्य कलत्रकृच्छ्रप्र
तिमोक्षणेन श्रृंगारपर्णस्य जितात्मनोपि चकार तोषं नरदेव
जन्मा २ ॥ नरदेवो राजा तस्माज्जन्म यस्य स नरदेवजन्मा प्रख्या
तो गौतमो दीर्घतमः स्मृतस्य तोषं प्रीतिं चकार कृतवान् उन्नर
त्याह मार्गेषु नितिवर्त्मनीत्यर्थः उन्नत इत्याह कलत्रस्येति प
त्न्या अहल्यायाः कृच्छ्रस्य कंटकस्य शिलारूपस्य प्रतिमोक्षणे
न तत्त्यागेन किंविशिष्टस्य जितात्मन आयातत्वशिवस्येत्यर्थः
श्रृंगारवर्णस्य नितेजस्वित्वात् अथोनेतरार्थे जितेंद्रियो
सावितिपाठांतरे तत्रासौ राम इत्यस्य विशेषणं श्रूयते किल
गौतमपत्नी अहल्या शक्रेण सह संगता तेन ततः पाषाणम
यी भवेति शप्ता रामावतारस्य विलोकनेन रेणुना स्ववपुः प्रा
प्स्यसीति शापान्तं कृतवान् इति पुराणोक्तिः पक्षे नरदेवज
न्मार्जुनस्तस्यांगारवर्णस्य गंधर्वविशेषस्य तोषं चकार मार्गेषु
वर्त्मसु किंविशिष्टेषु दीर्घतमोन्धकारे येषु तेषु इति तत्कल
त्रस्य यत्कृच्छ्रं कष्टं तेन यन्मोक्षणं तेन निमित्तेनेत्यर्थः वर्त्म
नि महांधकारे अंगारवर्णो नाम गंधर्वः कांतया सह संभोगं कु
र्वाणोर्जुनेन दृष्टस्ततोर्जुनेनोल्कायाव्यापादयितमारब्धः
तत्पत्न्याः सकष्टाचरणेन प्रतिमुक्त इति २ ॥ सार्धं द्विजैः संप्र
नथास्त्रिजिस्माकृपेयकपिख्यातकज्जस्य वंशो नयद्भसेनस्य
नयोपपन्ना राज्ञः पुरी भूपतिभिः प्रपूते ३ ॥ राज्ञो जनकस्य
नयोपपन्ना नगरी भूपतिभिः राजभिः प्रपूते पुण्यं वभूव ख्या
तकज्जस्य वंशे कज्जस्य कुलोत्पन्नाख्यातेरामेउपेयकषि
उपगते सति द्विजैः सार्धं महति किंभूतेनास्मिन् जिलोजाय
नपीलेसंहृत्त्रधाविस्मह्रते प्रकाशिनधामतेजो यस्य स नर
था तस्य किंभूतस्य नयतत्रसेनस्येति नयतानीतित्रासेनाय
स्य स तथा नयोपपन्नेति पुरीविशेषणं पक्षे राज्ञो यत्तसेनर
स्य कुमुदस्य नगरी तेन प्रपूते श्रपितप्रपरे शिवरुद्रालेननका
लाद्विजैर्ब्राह्मणैः सार्धं जिलावर्जनेन उपगते सति कज्जोटराज

ए॰
पा॰
१२
४७

विज्ञेनिष्टनिश्शनिकञ्जतस्य:स्यातःकञ्जनस्य वंशाभवोड्डयोंध
नस्मसतनपवब्रास्माणानूपेणतन्मध्येवस्थानात्सङ्घतथास्त्रिगुम
स्वीयेनजस्वीति ३ ॥ आलोलचामरमरालचितानरालैश्चा
श्रोत्कैरलंकृतापृथिवीश्वराणां नानादिगंतरजुषांकम
लाकराणामेकालयत्वमिवसानगरीजगाम ४ ॥ सानगरी
पृथ्वीश्वराणांपद्माकराणांसर्वसामेकालयत्वमिवपद्मा
यत्वमिवपकस्यानस्थितत्वमिवजगामगच्छतिस्म पवंन
गरीश्रवास्थत्वागतेत्यर्थः कमलालक्ष्मीःकवेहलयेषांते
कमलाकराःसलक्ष्मीका इतिविशेषणं वापकस्यालय
स्ववसतेर्भावः पकालयसाधारणविधानष्टःच्छत्रोत्करे
तपत्रसमूहैरलंकिता अत्रपृथिवीश्वराणामेवई षह्लो
लाश्चमराप्रवामलाहंसाले:चितंमेनरालमेषांतेनया य
ह्लाकमलाकराणामेकालयत्वंजगाम सर्वसाम्यलक्ष्मणस्या
नेवश्च सानगरीति पृथ्वीश्वराणांछत्रोत्करैःलंकिता
मकलाकराणामपिकमलमध्येराजहंसाश्रवतिष्ठन्तइति
नानादिगंतरजुषामिति पृथ्वीश्वराणांविशेषणं नानादि
शामंतरजुषांतन्मध्यस्थितानानन्तोत्रागतानांसर्वसामपि
विशेषणंभवति नानादिगंतावाकाशेवर्तिनामित्यर्थः उ
भयत्रापिसमानं ४ ॥ सघोष्टशाभरणकिरणैःसुरयंतोदि
गंनान्वीर्योत्कर्षादहमिहमिकाभूभृतोदर्शयंतः वैध्यवै
धरत्नरवइवतेप्रोषितामानुभावं तत्रायंतेविहितमनयः
शोभयंतिस्मरंगं ५ ॥ तेभूभृतोरंगमवयंवरस्थानेशोभयं
निस्म शोभयांचक्रुरित्यर्थः उभयत्रतुल्याः किंभूतास्तेसयः
रत्नकालमणीनामाभरणानांकिरणैर्दिशामंतान्सुरयंतोर
धम्नुवानःवीर्याणांसामर्थ्यानामुत्कर्षादथिकादहमहमि
वंश्रहंकारान्मामेववरिष्यतीत्येवंरूपदर्शयंतः मयैवेयं
याद्याइति अहमेवैषांमध्येसमर्थोरूपादिसम्पन्नइति प
नःसुल्कानिवहामयैवसाध्यइति दिनाग्रायेतीतिदाग्रयमा

येविहितामानैर्थैः यंद्भूतांतंद्भूणोत्तमयैवबलादियंहंत-
व्येतिभावः केकमिवशोभयति वैघालत्वेवाविध्यात्पत्राङ्-
मावैध्येविध्यसंबंधिनंसानुभागमिव विध्येभवावैध्या विध्य
स्यायैध्यत्वामिति प्रोषितानुरागमितासंवज्ञावा ५ ॥ अ-
थानुरूपेणजनेनगुणामनोज्ञवेशामनुजेन्द्रकन्या उपाययो
लोचनवर्त्मराज्ञासाङ्गेवमूर्तीमकरध्वजस्य ६ ॥ अथानंतरं
साराजकन्या सीताङ्गोपदीराज्ञांलोचनवर्त्मलोचनमयनु-
पाययो उपगतात्तेस्माहृष्टेत्यर्थः किंभूताअनुरूपेणयो-
ग्येनजननेवर्त्तिनागुणामनोज्ञवेशामनोहरालंकारगुणा
मकरध्वजस्यकामस्यकृतशरीरपाणिग्रहाअङ्गेवेति सर्व
चित्ताकर्षणादिति मनुजेन्द्रोजनकोद्भुपदोवा ६ ॥ सात-
त्रयानादवतीर्यतन्वीसौदामिनीवाम्बुदराजिमध्यात् स-
मीपमासमस्वपाणीकृतस्यचापस्यपुष्पायुधचापयष्टेः ७
सातन्वीः सीताङ्गोपदीवा तत्ररंगेयानादवतीर्य चापस्य
धनुषःसमीपमागतेति किंभूतस्यस्वस्यस्वकीयस्यविवाह
विधिपाटनस्यपाणीकृतस्यशुल्कीकृतस्यस्वेनात्मनापाणी
कृतस्येतिवा अंबुधराजिमध्यान्मेघपरम्परायामेतरतः सौदामि
नीवविद्युदिवयथामेघादवतीर्यशक्रधनुषः समीपंगच्छ
तीतिमनुजेन्द्रकन्या कीदृशीपुष्पायुधस्यकंदर्पस्यचाप-
यष्टिः धनुर्दंडइति ७ ॥ शान्तिर्मूर्तिमयीस्मरस्यजगतोना
रीमयंमेरुनं क्रान्तानामुपमामकल्पनकलाकान्तेः समुन्ने
जने लक्ष्मीः संसृतिसागरस्य सरसोलावण्यपुण्यंभला
साराजव्रजचक्षुषांपुनरभूदानंदपुण्यस्थली ८ ॥ सासी
ताद्रौपदीवाराजव्रजानांराजलोकानांनेत्राणांचक्षुषांद
र्शनानंदपुण्यास्थली अभूत् द्रष्टानांनंदस्येवपुण्यक्रय
विक्रयंगतस्यस्थलीतस्यानेबभूव आनंदपवपाणय
त्रुपवेभूतास्थलीइतिवा किंभूतास्मरस्यकामस्यमूर्तिम-
यीव्हनशरीरपरिग्रहशान्तिरचविशेषः सामर्थ्यंवाशान्तिर

रा॰
पा॰
५८

स्वांतेरेषोयाँनुत्साहादौबलेछियामितिविश्वः जगतः सं
सारस्यनारीमयस्त्रीरूपमंडनमलंकरणंकांतानांस्त्रीणामु
पमानकल्पनयासादृश्यस्यकलातस्यायः कांतेः समुद्रेज
नेप्रकाशनेकलावैदुष्येशिल्पादौकलनाकालमानयोरि
तिप्रकाशः संहतिः संसारः सप्तसागरास्तस्यलक्ष्मीरि
वकमलेवलावण्यपूर्णपाभसोसरसीवेतिलावण्यमेवपु
ण्याभइति ५ ॥ सौंदर्यश्रीपताकानिखिलयुवमनःसू
खेलालोकचंद्रः पंचास्यंदष्युदासः स्मरमुनिहृदयाक
र्षणः कामपाशः तारुण्योद्यानवल्लीपतिहृतकबलाक
शुकोदंडमौर्वीरेजेनक्षोनतात्रैवर्णहृतेकल्पिताप्रुष्प
माला ५ ॥ तस्याः सीतायाघोपयावाभुजलतायाश्चग्र
तर्वर्णार्थं स्त्रीकारार्थंकल्पितेति तांविशिनष्टिसौंदर्य
तोटकांगोयोरितिविश्वः निखिलयुवजनमनसांसमला
दनस्यनिमेषस्यन्युदासोनिरासस्तत्रहेतुरिवेति स्मरमुने
नारुण्यमेवमेवोद्यानेतस्यवल्लीवलनवपत्रुः सहृतस्यपु
पस्यकलेवकामकोदंडस्यकामधनुषोमौर्वीज्येव ५ ॥
यदेतदापीयहृष्णाप्रपेदमनुष्यलोकेप्यनिमेषभावं
सासीताङ्गोपदोवाङ्गयासिद्धोरूदिना उत्थितालक्ष्मीरिव
श्रमालावण्यानास्त्रितानियतेस्याप्येवाप्यस्तमेव उतप्रवासि
त्याह यतोहेतोरेनलावण्यमेतयोः सीताङ्गोपयोः सौन्दर्य
हृष्यानिपीय मनुष्यलोकेप्यनिमेषभावंनिमेषस्वल्पत्वंप्र
पेदेगतः देवानामप्यनिमेषतात्वधापानादिनिभावः १॰ ॥
राज्ञोमनोदर्पणमंडलेष्यप्रतोकमेकायकयापतस्मरंतो रगा

जवालाकुमुदाकरेषु रेखा हिमांशोः प्रतिबिंबितेव ११ ॥ बा
लासीताङ्गोपदीर्घराजसुशुभे केव कुमुदाकरेषु सरः स्वप्रति
बिंबिता हिमांशो रेखेव सा किं विशिष्टा राज्ञा मृणालदर्पणमंड
लेषु आदर्शसदृशेषु निर्मलेषु मनःस्वप्रत्येकं कायगापदेक
दैवोदके पुष्करे ती चेद्रेखापि तथैवेति साम्य ॥ ११ ॥ पुष्प
विचित्रैर्ग्रथिताविवेजे तस्याश्च नः कुंचितकेशपाशः तद्वक्त्र
पद्मोत्तमगंधलोभात्संगीभवद्भृंगगणस्येव १२ ॥ तस्याः सी
तायाङ्गोपधावावक्त्राब्जस्य मुखपद्मस्योत्तमगंधलोभाडत्क
हृतैरभलीभात्संगीभवंती निविडाभ्यगमालाभ्रमरपंक्ति
विवेति १३ ॥ वक्त्रस्य तस्याः प्रसमीक्ष्य शोभां तारापतिर्मंडल
मापभानोः तथापि नो साम्यमुपैति तस्मात्त्वलेतपः प्राप पुरा
रिमौलि १४ ॥ तस्याः सीतायाङ्गोपधावामुखस्याननस्य शो
भां कांतिं प्रसमीक्ष्य दृष्ट्वा तारापतिश्चंद्रो भानोरादित्य
स्य मंडलमापप्राप एतयोर्मुखस्य साम्यप्राप्त्यर्थं तपस्तत्र
मिवेति तत्कथापि साम्यताभ्यां न प्राप हैरण्यास्तुरारेः शिवस्य
मौलिं शिरः प्राप किमर्थं तपस्तत्रेन पसा तस्याप्यभविष्यती
तिभावः १५ ॥ एतस्या नेत्रशोभां तुलयति न यदा खंजनः प्रा
प्तकीर्तिं नूनं तेनापि हंतः श्रयति पदमतो योगयुक्तस्तप
स्वी तद्वन्नीलोत्पलेन प्रतिदिवसमतो मग्नमाप्रविष्टाः
कांतारं तद्देशः प्रथितमिह यतो नाल्पलभ्यं तपोभिः १६ ॥
प्रामा कीर्तिर्यैनाङ्गोत्कर्षेण समाप्रामकीर्तिः खंजनपोदिर
विशेषः वानापि नामदैन्यविशेषपक्षस्य हंतृनो शाकस्यागस्त्य
स्यपदं तपोवनं श्रयति गच्छति तपस्वी योगयुक्तो ज्ञानवान्
तपश्चरणायेति भावः तद्वदिति यथा तन्नेत्रशोभामलब्ध्वा खं
जनो दक्षिणाशां प्रतिगतः तथा नीलोत्पलेन तपश्चरणाय
प्रतिदिनमप्सु मग्नं तन्नेत्रशोभाप्राप्तकीर्तिः खंजननीलोत्पले
तद्वद्दैण्यापि हरिणास्तन्नेत्रशोभाप्राप्त्यर्थं तपश्चरणाद्वनं प्रा
महांतिकदैन्याह तयदेति यथा एतस्याः सीतायाघोपधावा गाने

रा॰
पा॰
४४
९१

त्रशोभां न तुलयति न सदृशीकरोति नूनमुत्प्रेक्षायां ऊनमेवे-
त्याह यत इह मथितमेव प्रसिद्धमेव तपोभिर्लभ्यमप्राप्यं ना-
स्त्येव सर्वमेव न प्रसाप्राप्यं तदित्यर्थः कांतारोरुश्रीमहारण्यमिति
विरुद्धः १४ ॥ तदेतच्छोभामनुकर्तुमेषा नाभूद्यतो दाडिमबीजपं-
क्तिः शक्ता नतोऽस्याः स्वहृदयं विदद्येन त्रापतमं भुवमीर्ष्ययैव १५ ॥
तस्याः सीतायाः श्रोपद्यावादंतशोभामनुकर्तुं सदृशीकर्तुमेषा दा-
डिमपंक्तिर्यतो हेतोः शक्ता समर्था नाभूत् न भूता ध्रुवमुत्प्रेक्षते
ईर्ष्ययैवामर्षेण तन्नामेन नतमसमपूर्हृदयं विदीर्णमिति १५ ॥
तदीयसौंदर्यसरोमृणालभुजद्वयं रक्तकरांबुजाय विकासना-
यं रविरागमतुल्या नवांशवो येऽप्रसरंति शोणाः १६ ॥ रक्ताभ्यां
करांबुजाभ्यां मायं व्यक्तं तस्या भुजद्वयं तदीयसौंदर्यमेव सरो-
त्कमृणालमिवेति तद्विकासनार्थमिव येनावांशवः शोणालो-
हिताः प्रसरंति रविकिरणातुल्या इति तत्सादृश्या इत्यर्थः प्रलै-
रपि सूर्यकिरणैरंबुजं प्रकाशामिति १६ ॥ नन्वेतेभ्यः स्फुटम-
नुशयाबद्धकोशांजलिभ्यः सानुक्रोशां निजकचिलवो दीयतामं-
बुजेभ्यः इत्यतेस्याः प्रतिपदमिव व्याहरद्भ्यां पदांते पादद्वंद्वल-
लितचतुरं नूपुराभ्यामुपात्तं १७ ॥ एतस्याः पादद्वयं चरणयु-
गलं नूपुराभ्यामुपात्तं गृहीतं तत्संनिधानमागत यावत् प्रति-
पदं पदांते चरणान्ते पतो इति व्याहरद्भ्यामिव वदद्भ्यामिव किं
तदित्याह नन्विति संबोधने एतेभ्यः सानुक्रोशां सानुकंपं यथा-
स्यादेवं निजकांतेर्लव एकदेशो दीयतामिति किंभूतेभ्य अत्रनि-
शानिद्रायां बद्धकोशांजलिर्यैरेवंभूतेभ्यः ललितेन चतुरं मनो-
ज्ञं ललितचतुरमित्याचिते पादयुगलं स्फुटमुत्प्रेक्षितायामि-
ति १७ ॥ गमनमलसयातैः जंभलक्ष्मीं जंघाभ्यां मविवलकं
रशोभामूरुकांडद्वयेन तदियमहरदेशां हेतुना तेन नूनं नि-
जवशोभिकरींद्राः पांसुपूरं क्षिपंति १८ ॥ तेन हेतुना नेवका-
रणान् करींद्रा हालिकेशानिजेस्वेव पृष्ठे शरीरे पांसुपूरं धूलि-
निवहं क्षिपंति तेन केनेत्याह यदिति नूनमुत्प्रेक्षते यद्यस्मादे

तोऽयं सीताङ्कोपदीवा पद्मांकरीङ्गणोगमनगतं अलयानैर्मदया
नैलहार पद्माङ्कभयोर्गंडस्थलयोर्लक्ष्मीशोभा ऊचाभ्यां स्तनाभ्या
मभ्यहरत् अविकलं च संपूर्णां करशोभां स्थलहस्तकान्तिमूरुको
रुद्रयेनाहरदिति अन्योपि सर्वस्वहरणेन दुःखेन शरीरमुल्लिलिपः
तीति उत्प्रेक्षा व्यंजनशक्तेर्विशङ्कोपिनाहृशैरिति १८ ॥ एवं नवे
क्षेषु वितर्कयत्स्वन्तेनावलोक्यावयवं तदीयं उत्क्षिप्य पाणिं निपु
णेन वाणी मध्ये सभं केनचिदित्यभाणि १९ ॥ केनचिन्निपुणेन कु
शलेनाधिकृतेन पाणिं हस्तमुत्क्षिप्योत्तल्पो मध्ये सभं सभाम
ध्ये इत्यग्रे वक्ष्यमाणां वाणीं वचनमभाणि उक्ता तदीयं सीताङ्को
पदीसंबंधं वा पूर्वोक्तमवयवा शरीरावयवं विलोक्य हष्ठानवे
क्षेषु राजसु एव पूर्वोक्तक्रमेण वितर्कयत्सु इति उभयत्र प्रधानं १९
हरानसंधनुरिदमीश्वराहृतेनिजौजसा कलितगुणं विधाय यः
प्रदर्शयेत्परिषदि लवलतां जयश्रिया सह लभेत स कन्यकां
२० ॥ किं तदित्याह इमां कन्यां सीताङ्कोपदीवा लभेत प्राप्नुयात्
जयश्रिया जललक्ष्म्या सहेति स कइत्याह यइति परिषदि सभा
या यइदं धनुः कलितगुणं दत्तज्याकं दर्शयेत्प्रकाशयेत् लवल
ब्धतां सीतायामित्यत्र लव्रो लब्धो हृदयस्थो···· योयासातद्ये
ति पश्चान्नवे कलितगुणं विधाय लवलब्धतां राजचक्रावेधं प्र
काशयेदिति केन कलितगुणमित्याह निजनौजसा बलेन ।
किं विशिष्टेन तत् ईश्वराहृतेन महादेवं विहायान्येन दुःखेन मंडःखे
नानमनेयस्य तन्नथा २० ॥ इति वचसि तथानीमन्यमात्रेन नरेशाः
पृथक् नवभुजदर्पात्तूर्णमुत्थाय पीठात् द्रुततरमभिपेतुस्तत्र
भीमरूपं फणिपतिमिव भोगिग्राहिणोग्रं सटहीनं २१ ॥ इति
पूर्वोक्तप्रकारेण वचसि उक्तमात्रे सति तदानीं तद्व्यवहितकाः
ले···· नरेन्द्राः स्वयंवरस्था राजानस्तूर्णं शीघ्रं पीठात्सिंहासना
दुत्थाय द्रुततरं यथा स्यात्तदेव तर्पणीभूतं धनुर्गृहीतुमभिपेतुः
धनुषः समीपं जग्मुरित्यर्थः कीदृशं धनुरत्यंतं शुभं भीमरूपं भ
यानकमिति किं विशिष्टाः पृथक् नवो महान्भुजदर्पो येषां ते अ

रा०
पा०
३०
30

तिवलिष्टाइत्यर्थः भोगिग्राहिणः सर्पग्राहकाजांगलिकागरुत्म
तोवाफणिपतिं सर्पश्रेष्ठमिव तेप्योषधादिनाबालिष्ठानमपि भी
महरूपभयानकमिति ११ ॥ कन्यांनिधानकलशीमिवकार्मुकं
चभीमभुजंगमिवतत्प्रतिबंधभूतं दृष्ट्वाविलोलमनयाकतिचि
त्क्षितीशानावनम्रशिरसमपिदमनामवापुः ॥ १२ ॥ कतिचित्क्षि
तीशाराजानस्तद्धनुरादावग्रहीतमशक्तिं तत्पङ्क्तिवानदमनामव
पुर्नसमर्थाबभूवुरित्यर्थः किंविशिष्टा विलोलाद्दोलामतिर्ये
षांतेनतथापतनमनेनास्यालाभस्तन्नमनेवाधाकयमतोयदि नत्र
स्यात्तदाकथं तल्लाभइत्युभयरूपत्वं किंकृत्वेत्याह कन्यामिति
सीतांद्रौपदींवा निधानकलशीमिवनिधिकलशवल्लभ्यां ध
नेमनेनतल्लाभइति उक्तिंनतमाःकार्मुकंचभीमंभुजंगमिव
कालसर्पवद्रूपमाकारं धनग्राहादातेनदमाः तत्प्रतिबंधभूतं
तल्लाभप्रतिबंधकंदृष्ट्वाविलोक्यकेचित्तु कन्यांनिधानकलशी
मिवनादातेनवात्यक्तं दमनामवापुरितियोजयंति तत्प्रतिबं
धभूतंभीमंभुजंगमिव धनुर्विलोकयंति निधिकलशस्यास्याद
दाने···· तत्प्रतिबंधकभुजंगदर्शनान्मागच्छेति भुजंगस्यापि
बलत्वादन्यत्रगमनेनतत्प्रतिबंधापगमान्नलाभःस्यादिति
पतान्नस्वस्थानस्थितत्वाद्भवुरितिभावः ११ ॥ साभिमान
मनसोनवाधिपाःकेचिदादावितिबाहुसाहसाः केपिचापमनाति
बाहुविक्लवाःऊर्ध्वंतेस्मनिजमानसानतं १३ ॥ केचिद्राजानो
निजमानंचित्तसमुन्नतिमानततंनत्रऊर्ध्वंतेस्मशक्ताः मानहननत्व
दृढभूवुरित्यर्थः किंविशिष्टाः चापस्यग्रहणेनतौ नमनेबाहुवि
लक्षावीर्येषांते चापनमनासमर्थाइत्यर्थः मनस्विनसमन्नतोग्रह
हीनमादिनीकाः केचिदाचतिनबाहुसाहसंयेः सतावाङ्मुखमा
साभिमानमनोयेषांतेसाहससकाराइत्यर्थः १३ ॥ दृष्ट्वाकेचन
केचिदीक्षणमपादेन्यकर्णस्पर्शनादेकेपारणानंतःसगर्वमित्तवे
हीनलस्फालनात् ध्यानमीकर्णानंतरंकेनापियोजीवादनीचूढ
नान्योर्द्धेडनेयमालिनीवन्दपतोवेधपञ्चमास्तेभवान् १४ ॥ ते

राज्ञानस्तास्मिन्कोदंडे धनुषिवंधश्चमानिष्कालप्रयासा
प्रभूवन् बभूवुः किंविशिष्टेतास्मिन् नयशालिनिन्द्र॰
पतौनीतिफलकेराजनिअपरेत्वपतयोनयवंतोवंधश्च॰
माभवंतीति कथमित्याह हस्तादिति केचिद्धस्ताउत्तरह
हैवेत्यर्थः केचिद्दीक्षणपथ्या उत्तरहष्ठानिहेत्राद्धत्यर्थः
अनव्यवसायादिति अन्येकरस्पर्शनादिति हस्तागत्वा
हस्तस्पर्शनंकृत्वातज्ञारणानव्यवसायादिति एकेधा
वणादिति सगर्वं यथास्यादेवं गुणोवृत्त्वेति तदपिमव्या
पादानव्यवसासादित्यर्थः निपुणाद्इति इतरेकरश्चाल
नाङ्गगुणश्चालनादिति परेप्रानप्रीकरणमीमत्रप्रीक
वणांतस्मादित्यर्थः कतिपये जीवाटनीधनुःकोद्गोल्लर॰
यर्चहनाश्चाल्लनात् शरसंधानेसामर्थ्यादितिभावः २५
मङ्गांगचेदिमगदेशाधुरःस्मरेषु तज्ञायराजसुजलंमन
सादपत्य जिस्नुर्द्विजेंद्रनिकटाद्धरिवंशकेतुर्गर्भोद्दिवा
म्निरुणोदगात्कुमारः २५ ॥ कुमारोरामोद्विजेंद्र॰
निकटाद्विप्रस्यामित्रसमीपाउदगाउत्थितःप्रस्तावात्र॰
उत्तरंहरणायेति जिस्नुर्जेयनशीलः हरिवंशसत्त्व
येवंशस्यकेतुर्ध्वजवःशोभमानः अरुणेरग्निमंथनका
हस्तगर्भान्निधाद्रिविवोदगात् मङ्गांगचेदिमगधादे
प्राविशेषास्तेषामीश्वरास्तेदेशाधिपतयस्तेपुरस्मरात्र
अगमनीयायेषांतन्मत्तनिमुराजस्तत्ज्ञायमन्तकल्या
यत्नाविचाय॰॰॰॰ जलेदतस्मात्विति तज्ञायतत्विर॰
यधर्मायेनिवामनसेतिवादतत्रापिगितिमनसाकृत्वेति
पदेजिस्नुःकुमारोर्जुनोब्राह्मणसमीपाउदगात् ह
रिवंशकेतुरिति हरिर्वानरस्तस्यवंशोवर्गःसमूहोह
नूमानस्तेनापतित्वात् यदाहहरिर्हनूमान् वंशोवर्णोय
स्येतिविभक्तिबहुव्रीहिः हरेरिंद्रस्यवंशस्यकेतुर्ध्वजो
वानस्तत्वादर्जुनस्येति हरिसंज्ञार्कवानास्यसुकभे॰

रा॰
पां॰
३१

कथमाह हि उ कर्पोसिं हे श्रीशाङ्के चेति मेदिनीकारः वंशो
वर्गे जले वेणौ पृष्ठस्यावयवेपि चेति विश्वः १५ ॥ वीर
श्रीमान्नन्दगाचलतनलतुलादण्डसुवीपतीनां गीर्वाण
द्वेषिगर्वाम्बुधिमथनमहारम्भमन्थाचलेन्द्रं श्लाघानिः
शाणकाणं जगदुदयमहाहृष्टिमाहेन्द्रचापं चापं दोर्वि
क्रमाग्नेः समिधमिव निजस्याददे राजसूनुः १६ ॥ राज
सूनुः नरपतितनयो रामस्वापं चनुराददे जग्राह कीदृशं
वीरस्य शूरस्य श्रीलक्ष्मीमानाश्रितस्य सुवनितलौ तुंगाव
दलाविव महत्त्वेनाविवनयोस्तुलने तुलादण्डमिव स्व
र्णकारतुलामिवेत्यर्थः तुलासादृश्यमानयोरिति स्म
मृतः गीर्वाणेति गीर्वाणा देवास्तद्द्वेषिणो दैत्यानां यो ग
र्वाम्बुधिर्गर्वसमुद्रः तस्य मथनस्य विलोडनस्य महारम्भो
मन्थाचलं मन्थनपर्वतेन सर्वं मथना श्लाघेनिःशाणो वा
घविशेषस्तस्य कोणं वादनदण्डमिव श्लाघ्यास्ति यो प्रशंसा
यां परिचर्याभिलाषयोरिति मेदिनीकारः कोणो वीणा
दिवादनमित्यमरः जगतामुदयार्थं यामहतीहृष्टिस्त
त्र महेन्द्रचापमिव इन्द्रधनुरिव दोर्विक्रमाग्नेर्भुजपरा
क्रमस्य समिधमिव होमद्रव्यमिव समिधं दीपके केचिर
दिति पदे राजसूनुरर्जुनस्तल्पमन्वपत्
सोऽभिमतं धनुः परिषदावाल्यादवलोकनं १६ ॥ हृष्टः
मायनिस्तुलानयामस्ताद्यमद्रावरं गृहीतवांश्च
भजायतरसामांद्रीभवद्भिस्सार्थेर्जपालोवामदनीसुवे
नवदयन्के नापिनालोकितः १७ ॥ सरामः श्रर्जुनो
लोचमस्यमानयानिर्वाहेन भविष्यमवगच्छन् वा
नैयथास्यान्यथापरिषदा सभयाहृष्णावलोकितः
नोधनुर्गृहीतवान् प्रथमसायानिस्तुलनयामस्तामसगो
रवं दधतरं मनिवचनेयस्यास्याः क्रियायोग्यस्यादे

भुजेति ततोऽ
वं दृष्टेनेन प्रतिज्ञानिर्वाहः स्यादिति भावः धनुः सांद्री
ज्ञायत इत्याह हस्तबलेनोत्क्षिप्तोत्तोलनमयत्न विस्मयो यत्र
भवद्विस्मयं यथा स्यादेवं दृष्टं निविडीभवद्विस्मयः
अहोऽस्य वयः अहो ब्राह्मणस्य बलमित्यादिना विस्मयः नापि
अटनीति ततो हनौ त्वेन ज्वाले वेगेणं घटयन्केनापि एतच्छ्रीरामकार
न दृष्टो न चावलोकितो लज्जयेति भावः गुणाकर्षणकर्मधीरेणा
वितयावेत्यर्थः २७ ॥ तस्मिन्गुणाकर्षणकर्मणि पार्थिवीस्य बाणा
ज्ञात्मजे शंकरकार्मुकस्य बभूव भंगः पार्थिवीस्य नृपात्मजेन मे
कर्णव्यथाधायि कटुस्वनस्य २८ ॥ तस्मिन्नृपात्मजे धैर्यशालिनि
गुणस्य धनुर्ग्रहणस्याकर्षणकर्मणि धीरे धैर्यशालिनि
सति शंकरकार्मुकस्य भंगो विदारणं बभूव तादृग्धाभा
वोद्भव इत्यर्थः राज्ञां कर्णयोर्व्यथादायी कटुस्वनो यस्येति
एवंभूतस्य एतेन ग्रहांग्रकल्याणं यथा स्याद्राज्ञां भंगो बभू
वेति योज्यं राजात्मजेऽर्जुने करकार्मुकस्य हस्तधनुषोऽ
णाकर्षणकर्मणि धीरे ···· लाभात्तस्य कल्याणकारित्व
मिति भेदे रोगतरंगेषु भंगो जयविपर्यये इति मेदिनीका
रः २८ ॥ साकं भूपैर्मानभंगं प्रपन्ने चापेन स्मिन्निर्दिष्टाल
ब्धसिद्ध्या व्रीडानम्रा सादरं राजपुत्री कीर्त्यारामं प्राप दृ
ष्ट्या कुमारं २९ ॥ राजपुत्री सीता कुमारं रामं प्राप दृष्ट्या
हृदयानंदजननी कीर्तिर्यस्याः कीर्तनीया व्रीडया नम्रा सलज्जा
इत्यर्थः लब्धस्योद्वाहस्य समीचीनवरस्य सिद्ध्या प्राप्यानि तस्मिन्नृपे दृ
हेलया धनुष्याकीर्तिस्तत्र लब्धाणवात्तनीया
पैः साकं मानभंगं प्रपन्ने सति धनुषोनमनेन प्रहृतिमान
भंगः राज्ञां च नमना प्राक्रम्यमानहानिरभूदित्यर्थः मानो
माणे च प्रच्छादो मनाक्स्विन्नोन्नतो ग्रहद्दनिविष्टः एते ए
जपुत्री सीता पदोकुमारमर्जुनं कीर्त्यार्थसमभिरामं तस्मि
न्नृपे लब्धा सिद्ध्या वापा च कृत्वे पद्मपस्य लब्धस्य सिद्ध्यानि
वहणेन निर्दिष्टा स्वस्थिता प्रोपिसमाने २९ ॥ हेलयानेर

रा॰
पं॰
३२

गरौरभ्रपल्लवैः क्रमात्तन्वी हृष्यमानालतेव स्नातं भेजेरा
जवंशप्रदीपपूर्वाबोधितैः स्ववंतीवसीता ३१ ॥ भृंगार
वृतैर्धर्मरसस्पृहैर्लेखितासीतानेरामराजकुलस्पृ
प्रवंशप्रदीपप्रकाशात्वात् भेजेमिषेवाकिंविशिष्टे
वैरसौगंधपल्लवैः स्वभावीरसौरभल्लवैरित्यर्थः कीदृशी
सीताकृसाधृपामानन्वीकृशालतेवहृष्यमानाभवानि
भृंगवृतैर्वाहृष्यमानापूर्वमसङ्गेस्वः स्ववंतीगङ्गनीव
नेही गंगेव पते कृस्लाझापदीनमर्जेनेस्वः स्ववंतीसी
गंगेवसीताचगंगाभद्र इतिविस्तुपुराणे विस्तुपादसतु
हूतास्नावयंतीः स्वमंडले समंनाछ्रस्नणः पुण्यागंगाप
तानिवैदिवः स्नानत्रपतितानाद्हिल्वचन्द्रवाप्रतिपद्यते सी
तावालकनंदाल्वव्रभेदेनिवैक्रमात् भृंगलग्नैर्धर्मर
सस्पृहैर्लेनेवहृष्यमानाराजचंद्रस्तद्वंशप्रदीपसोमवंश
प्रकाशकं शोभंसमानं ३१ ॥ राज्ञोलज्जः कलंकः स्वल्प
गुणवधाभिणिस्थापितः कार्श्केण हेपिष्टनस्यकोटौनि
गुणमुपहिताराजपुत्रेणमौर्वी स्पलानद्धाजमूलेनिजव
वर्णसावीमंतमालाक्रमायी मालायांसाफवादैः सहस
कलज्जेनर्पितानेत्रमाला ३१ ॥ कार्श्केनपत्तधाराज्ञो
शुवधाभानिवक्रचंद्रे लज्जारूपः कलंकः स्थापितस्तस्प
धनुषः कोटौवद्धेहेपिष्टेशीघ्रं यथास्यादेवंनिपुणयथा
स्यादेवंराजपुत्रेणाज्ञेनेनवामौर्वीज्याउपहितानिहिता
नद्धाजमूलेराजपुत्रवाजमूले राजपुत्रवाजमूले राजपु
चैवाजमूले स्कंदे नद्धावर्णसावी नद्भयचवर्णस्वस्त्व
वर्णमालाक्रमायांसीनयाद्वैपद्यावा मंदः शीघ्रंत्यक्ता
श्रोत्रेपितानस्यांचमालायांसाफवादैः सहसकलज्जैने
नेत्रमालाऽर्पिताइतिमालादीपकः ३१ ॥ भयोत्साहेग
निवदनिनः सर्वेनोराजलोकैः राज्ञोतेनस्वमयभवनंप्रा
पितानांसहर्षं निर्दिष्टानांगुणोंगुरुकामिरामानैर्ज्ञातमजा

नांसर्वेषामप्यजनकगपत्रवैवाहिकश्रीः ३१ ॥ त
त्रजनकेन सर्वेषां मानवेन्द्राणां दशरथपुत्राणामेकगम
देववैवाहिकश्रीः विवाहसम्बद्धिवाहोपयुक्तसंवि
धानं अजनिजाता विवाहेजानेनिवा किंभूतेन सहबंध
धास्यादेवं तेन राज्ञा जनकेन निजभवनं प्रापितानां क
स्मिन्सतीत्याह भयउत्साहोयस्मात्तस्मिन्राजलोके सर्व
तोगतवतिसति स्वकीयगृहं गतवतीत्यर्थः मुनियो
गुरुर्विश्वामित्रस्तेनागितानिर्दिष्टानां अनुज्ञातानां यदे
तेषांयकधिष्ठितानां तत्रद्वीपथावैवाहिकश्रीः समज
ति सेवपरिणतेत्यर्थः मुनिर्योगुरुः अंतीतयोगित
वचनेन तेन राज्ञाद्वीपदेन निजभवनेनीतनामितिशेष
समानं ३२ ॥ तेतत्र सर्वे समकालमेव संप्राप्य दाशरन्स
न्सहर्षान्विरेजुः त्रैलोक्यसंशोधनजागरूकान्तांगावि
भागानिवसिंधुनाथः ३३ ॥ तेसर्वेरामादयस्तत्रसम
कालेत्वल्पकामेवयोग्यपाल्ल्दाशरान्सीतांद्रौपदीवाप्राप्य
विरेजुः बभुः त्रैलोक्यस्य संबोधने सम्पादने जागरूका
स्तावधानान्विमुञ्चानितियावत् गंगाविभागानांगा
तरंगान्प्राप्य यथा समुद्राः शोभन्ते इति ३३ ॥ संबंधा
न्कादितान्मनां निजपदं प्राप्तमनः ऊर्वती दिक्कुंजेषुनि
वेनं प्राविरतां हात्रपदीमहः तेषांविक्रमवानवेल्लि
तनिजक्रोधानलप्रदीप्तः साक्षात्कालजवोदितोदग्र
पतिदुर्योधनोभ्यागमत् ३४ ॥ तेषांरामादीनां श्राभिभ
विश्वपतिः परशुराम आगतः किंभूतो दुर्योधनो दुःखे
नयोद्धुं शक्यः पुनः किंभूतो विक्रमाधनुर्भंगादिरूपः
मपववानस्तेनवेल्लित उद्दीपितो योनिजश्चात्मीयः क्रो
धानलस्तेन प्रदीप्तः प्रेरितस्तथकाकूतिनियावत् साक्षा
श्रुतीरमविग्रहाः प्रत्यक्षकालोपमइवेति तेषांकिंभूता
नां संबंधाद्विवाहादिनाकन्यालाभात्प्रादितान्मनांनिज

र॰ पं॰ २३

परं निर्गच्छतां गंतुमनः अर्वतां त्वावंदावियसंबंधिनिजं
महत्तेजोदिक्कुंजेषु दिगंतेषु निरंतरं विहितपनो विकिरतां
सतां दुर्योधनो भिमुखमागमत् कथीष्टिरादीनां सावधा
नुपातिव प्रयाणाभिमुखं वास्थितः अभिमुखः पुरुषः
प्रयाणानिष्टफलदं अनपवकालोपपद्यते तेषां फ
धिष्ठिरादीनां विक्रमपवाङ्किलेनेत्यादि सर्वं समाने
३४ ॥ स्व इशानमश्चत्रमप्युचापं शाणकं इतिमविंडयत्
तोस्य परलोकजिगीषयैवसाकंतत्पनेकौशिकनेद
कनंदनो विश्वामित्रहर्षजनकः कुमारः ३५ ॥ स्वपनेदशरथस्य पुत्रो रामः कौशि
णाकं इतिंशणविकर्षं प्रविंडयत् विंडशाश्चकार अर्थो
दस्येनद्वानमंचापं पत्रानमथानंतहृत्वा परलोक
जिगीषयैवसाकमिति परलोकस्य स्वर्गलोकस्याम
नशक्तिस्तस्यानीमापिविंडितेत्यर्थः स्वर्गमार्गस्यते नरा
निरुद्ध इतिभावः यद्वे कौशिकः इंद्रस्तस्य स्वर्गलोक
स्यागमनशक्तिस्तस्य दुर्योधनस्य शणकं इमविंडयत्
परलोकस्य शत्रुलोकस्याजिगीषाजयेच्छा तस्य चेन
निवर्तते तयासाकमिति शेषं समानं ३५ ॥ अथप्रत
रप्रयाणेनतत्र संबंधमाथं प्रकृतिगुरुस्वहस्ते प्रोक्षितैः
कांक्षमाणाः वधिरितभुवनांतार्धभिर्भीविषावै हृदीध
मिपपयोधरास्तां पुरीतेभिजग्मुः ३६ ॥ अथानंतरं तेरा
माश्वःस्वां पुरीमयोध्यामभिजग्मुः गताः पयोदामेघाः
सन्नद्धामिव धूलिभिर्भीणाविषाणैः शार्दूलधीधितभुवनांता
व्याम भुवनांतरालः मेघाअपिशार्दूलैः रसैः पूरयंतीति
नासिन्नरश्मरामेसंधिंतथानंतबंधविधायाप्रयानेअ
पगतेनसति स्वप्रयानेगतेसतीत्यर्थः प्रकृतिः शिष्यगु
मीनपस्कृत्यितं पभिः प्रोषितैः विशेषयकैर्दर्शनार्थं
माकांक्षमाणाइति आकांक्षमाणानितिपाठेमहत्यकोत्त

नीयेति तेनतैः सहगतानाइतियोज्यं पदेनास्मिन्नुद्यानेस
तितेषांधिष्ठितादयः संधिसंधायविधाय गुरुद्रोणाचा
र्यैः स्वांशुरीमिंद्रप्रस्थं पोषं समानं आक्रान्तमाणा इति
नाञ्जीलवयोवचनशक्तिर्वा ३१ ॥ सुहृद्भिराभिरभिनं
दितानांप्रतापविश्वासतपाञ्चवाणां गुणोदयप्रीणितर
सज्जनानां तेषामभूत्तत्र सुखं निवासः ३२ ॥ तेषांरामा
दीनां कृपाधिष्ठितादीनां तत्रपुर्यामयोध्यामिंद्रप्रस्थवा
सुखंयथास्यात्तथैवं निवासोबभूव किंविशिष्टानां सुहृ
द्भिर्मित्रैराभिः प्रतीतैरभिनंदितानां कृतप्रशंसानाम तु
मोदितानामित्यर्थः गुणोदयेनप्रीणितानासज्जनायेस्ते
षां प्रतापेन विश्राविताः शात्रवायैस्तथा ३३ ॥ गुणैर्गरी
ज्यायसि भक्तिनम्राः पृथग्धुरीणाअपि दर्शितैक्याः
दिशांविभागानुपपद्यमाना भांतिस्म चत्वार इवार्णवा
स्ते ३४ ॥ तेचत्वारोरामादयोभांतिस्म शोभंतेस्म चत
सृदिक्षुव्यवस्थितानाञ्चत्वारोऽर्णवाइवेति समुद्रतुल्याः
दिशांविभागानुपलभमानागङ्गादिविभागानां उप
लंभं ज्ञानं कार्यमाणाः गुरौवसिष्ठे ज्यायसि ज्येष्ठे भक्त्या
नम्राः गुणैर्ज्यायामश्रेष्ठेवेतियोज्यं पृथक् प्रत्येकं धु
रीणाराजकार्यधुरंधराअपि गुणैर्दर्शितैक्याएकीभूय
राजकार्यसाधकाइत्यर्थः समुद्रा अपि दिशांविभागज्ञा
पकाअपिनश्चाननम्राः पृथक्स्थिताअपिदर्शितैक्याः
समुद्रत्वेनरूपेण पक्षे तेचत्वारोभीमादयोभांतिस्मर
ज्यायसि ज्येष्ठे भ्रातरि युधिष्ठिरे गुणैर्गरीयसि मत्तेः शा
स्त्रादिगुणैर्हेतुभूतैर्भक्तिनम्राः श्रेष्ठागुणाः पुरुषश्रेष
र्येति तेगुणाउपायपरिणता उक्ताः शेषंतुल्यं ३५ ॥
तेस्त्वग्रजाभिर्विभौराजाकुमारैः पार्श्ववर्तिभिः सुमेरुरिव
विष्कंभैः सहविपर्यस्यभूषितैः ३६ ॥ तेस्वाग्रजाभिरामादि
भिः पार्श्ववर्तिभिः समीपस्थैः कुमारैराजादशरथोवभौ

रं० टी० ३४

34

शुशुभे किंभूतैः प्रकोष्ठैः तिष्ठस्तत्र प्रस्थो वंशो हरिशादि
त्यप्रस्थो यत्र सहरिप्रस्थः सूर्यवंशस्तेन भूषितैरिति य
द्वा हरिः सूर्यः प्रस्थो मानं प्रमाणं यस्य स हरिप्रस्थः सू
र्यवंशस्तत्र भूतान्यत्रियैर्यातैः सहग्रवितैरिति प्रस्थस्य सू
र्यवंशस्य भुवि भूषितैर्वा सह्याविष्कैर्ये विस्थानैर्मेदरादि(
भिः पर्वतैः समेतः शोभते सहहारणाणिहेनवनैः सह
विः प्रस्थः सानुस्तेन भूषितैः विष्कंभो योगभेदस्याद्वि
ताः प्रतिबिंबयोरिति मेदिनीकारः सानौ मानेस्त्रियां
प्रस्थे इति विश्वः पतेस्त्रगर्भिभी मादिकं मात्रैराजायस्य
श्रिया हरिप्रस्थभूषितैरिति इंद्रप्रस्थस्य भुवि भूषितैः इंद्र
प्रस्थस्य भूषामलंकारमिति गतैरितिर्वा इंद्रप्रस्थेन भूषि
तैर्यकैरिति नात्ययं इंद्रप्रस्थेन भूषितैर्यकैरितिनान्य
थे इंद्रप्रस्थनगरे भूषितैर्भागगतैरितिवा ३४ ।। मुनी(
श्वरैः समयेनिविष्टैर्बाधितानां भृशासामदारैः दिनेदि
नेपार्थिवनंदनानां परस्परं प्रेमभरो मुमूर्च्छ ४ ।। पार्थिव
नंदनानां रामादीनां दिने प्रतिदिने परस्परमन्योन्यं प्रेमभरो
मुमूर्च्छ ववृधे श्रमैः दारैः पत्नीभिरात्मदारैर्वा भ्यशामन्य(
श्रमाबाधितानां मुनीन्द्रेण वसिष्ठेनादिष्टे उपदिष्टे समीपे
निविष्टैः स्थितैः पतिशुश्रूषापरैरित्यर्थः पक्षे पार्थिव
नंदनानां कपिष्ठादीनां मुनीन्द्राणां रदसमयः क्रियाका
लाभ्यवस्थितानियावत् यथानुरूपव्यवस्थाउपभोगव्यव
स्यापंचानामपि सीमपदीविषयेज्ञानेनैवमणातीति स्त्र(
स्थमाने ४ ।। इष्टावलोकं जननीज्ञगृहणेनेजातिभा
विदूरवनेदधानं राजामसात्रब्रमनीलसानिमास्थापयन्ती
र्योनिषेवणाय ४ ।। राजादमारथः शत्रुघ्नसहितं भर(
भैनामसत्कृत्य कैकेयंतीर्थानिषेवणाय उपायति निषेवणा
यविधाभ्यामार्थं मानामहानिषेवणाय स्थापयन्त प्र
षयामासनीर्थं प्रामखधवलैः स्थापनानीरजः संघ ग्रव

तार्विजष्णुंवुपाञ्चोपाध्यायमंत्रिष्णुरितिमेदिनीकारः अ
निक्रान्तोभास्वानादित्योयेन एवंतेजोदधानपार्थयेतेज
ननीगुरूणामपितृप्रादीनामिष्टावलोके इष्टमार्के दिने अ
वलोकनेयस्यतं अनीलः सर्तिरेखोयस्यतं पदे सदा
ज्ञाकाधिष्ठिराशत्रुघ्नं शत्रुहंतारं अनीलसमिंश्चेताम्रम
ज्जुने तीर्थानिषेवणाय तपस्यर्थंप्राध्यापयत् भवंतेभ
रतजलोत्पन्नमन्यसमानं ५१ ॥ सर्वांसिशैलासरितश्च
तीर्त्वांगाञ्छन्नहीनात्मजयैधितश्रीः वीरः किरीटीसभ
जोपगूढस्त्रियागदास्यातिशयंविरेजे ५२ ॥ सर्वीरोभवत
स्यातिशयमत्यर्थंविरेजे अशोभत किंविशिष्टः किरीट
वान्बद्धमौलिः स्वभुजेनोपगूढमालिंगितंचित्रंनानारूप
मंगदंबाहुकटकंयेननेसरः प्रधनीनितीर्त्वासंतीर्यागा
छेत् अहीनेनाधिकेनात्मजयेनेरितासश्रीर्यस्यतामिति
यद्वा नहीनआत्मायस्यसाधीनात्मासाभिमानः सुमान्
नस्यजयेनाधितासश्रीर्यस्यतं पदे किरीटीअर्जुनः स्वभुजो
पगूढश्चित्रांगदापाइस्त्रीयेनसततथा अहीनांसर्पाणा
मीश्वरस्तस्यात्मजया उलूप्यानाम्नाप्यधिताश्रीर्यस्य स
नथासमानमन्यत् ५१ ॥ प्राप्य प्रभासंपदमिष्टयोगा
मातामहस्यानअपेत्यराष्ट्रं संतोषितः द्रोणिभुजाच्युते
नलेभेसस्सुभद्राधिगमोत्सवंसः ५३ ॥ सभवतः सुभद्राधि
गमोत्सवंसुभद्रायाः कल्यानानामधिगमोयत्रमहोत्स
वंतंलेभे प्राप द्रोणिभुजाराज्ञाच्युतेनास्थिरेणसंतोषितः
मातामहस्यानेराष्ट्रंकेकयराष्ट्रमुपेत्यप्रभासंपदंप्राप्य
इष्टयोगि अभीष्टफलं पदे अर्जुनो मातामहस्यानमा
गत्य यादवदेशंगत्वा सुभद्रायाः अधिगमेनपरिणयरू
पेणोत्सवंसलेभे अच्युतेनकृष्णेनसंतोषितः द्रोणिभ
ताधूर्मिभर्ताप्रभासंपदं प्रभायादीप्तेः संपदंप्राप्यपोसम
मानं ५३ ॥ सहत्यापापारिजातनस्यपुष्पैः दीप्तांबुधेरिव रेजे

पां॰
टी॰
३५
35

सौभद्रसंतानलक्ष्म्या प्रीतस्य चोन्वयः ५५ ॥ अस्माद् प्री
तस्य चः स्तूयस्यान्वयो भरतो रेजे भद्रसंताने कल्याणपरंप
रातस्या लाभेनेत्यर्थः पारिजातस्य प्रसूत्या पुष्पेण तीव
समुद्रस्य पूर इवेति यद्वेयस्मा वर्जुनो भद्रायाः सुभद्रायाः
संतानलक्ष्म्या अभिमन्युनामपुत्रलाभेन यद्वा सुभद्राया
अपत्यं सौभद्रः संतानस्तस्य लाभेन प्रीतस्य चन्द्रस्यान्व
यो वंशा उत्पन्न अन्यत्समाने ५५ ॥ कमनीयमया मुसन्नं
दृष्टः सर्वदेहिनां स राजनंदनो रेजे कामदेव इवापरः
५५ ॥ स राजनंदनो भरतो रेजे अपरो द्वितीयः कामदे
वः कंदर्प इव सर्वेषां देहिनां कमनीनया नंदयमानं द
प्रसन्नवर्धयन् यद्वा राजनंदनोर्जुनः अपरः श्रेष्ठ इति अन्य
त्समाने ५५ ॥ इति श्रीराघवपाण्डवीये महाकाव्ये सीता
द्रौपदीस्वयंवरो नाम द्वितीयः सर्गः २ ॥ ओं नमो गुरवे ॥
स राजाभिमतो लोके विजयोर्जितविक्रमः हरिसारथि
नाभ्यर्थयाचितो भूद्दिवो वने १ ॥ स राजा दशरथो हरिरिं
द्रस्तत्सारथिना मातलिनाभ्येत्यागत्य दिवः स्वर्गस्यावन
रक्षणाय याचितोभूत् बभूव स किंभूतः स्वर्गस्यावन
नाजितो महान् विक्रमो यस्य स किंभूतः विजयेन शत्रुजये
भूतः यद्वे हरिर्वायुः सारथिर्यस्य तेनाग्निनाभ्येत्य विजयो
नः दिवः स्वर्गस्य वने विडवनाम कं याचितो भूत् सत्य
र्थः अर्जितो विक्रमो येन लोके राज्ञो याचितो भूद्दातायि
